श्रावणमासः
वर्षम् – ६९
दशमोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ अगस्त २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ५ |
| ६ | कबीराऽऽवाहनम् | मिश्रोऽभिराजराजेन्द्रः | ६ |
| ७ | स्वरमङ्गलायां प्रकाशितछन्दमुक्तरचनानां... | भंवरलाल शर्मा | ७ |
| ८ | विशेषयोग्यजनसेवारता स्नेहलता | शिवशरण नाथ त्रिपाठी | १४ |
| ९ | संघर्षः | डॉ. राकेश शास्त्री | १५ |
| १० | प्रियं भारतम् | रमेशचन्द्र शर्मा, प्राध्यापक | १७ |
| ११ | वास्तुशास्त्रस्य परिचयः | मुकेश कौशिक | १८ |
| १२ | श्रीअजमल-भक्ति-गाथा ( काव्यम् ) | आचार्य पं. नथमलशास्त्री दाधीचः | २० |
| १३ | चण्डवैशाखवाताः | मिश्रोऽभिराजराजेन्द्रः | २२ |
| १४ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २३ |
| १५ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २४ |
| १६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २५ |
| १७ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | २५ |
| १८ | आद्यशंकराचार्यस्य आत्मबोधग्रन्थे | युगल किशोर भारद्वाजः | २६ |
| १९ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २७ |
| २० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३१ |
| २१ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३३ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9783105699

(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्व. स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

राजीव दाधीच
व्यवस्थापक

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाले यस्य विराजते शशिकला गङ्गा च कल्लोलिनी,
कण्ठे यस्य च शोभते हि गरलं वक्षःस्थले व्यालराट्।
अङ्के यस्य नगाधिराजतनया प्राणप्रिया पार्वती
व्याधस्याजिनधारिणं पशुपतिं वन्दामहे शङ्करम्।।

## मासावतरणम्

श्रावण्यां सुधियो जलेऽतिविमले कुर्वन्ति स्नानादिकम्
कासारेष्वथवा जलेन बहुना पूर्णासु वापीष्वपि
नानाद्रव्ययुतैर्जलैश्च विधिना कुर्वन्ति कर्माण्यलम्
भक्त्या तर्पणपूजनैः ऋषिगणान् प्रीणन्ति वै श्रावणे।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

श्रावण
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
अगस्त, 2019
अङ्कः -10
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# समाधीयतां कृषिकाठिन्यम्

...✍ पं. प्यारेमोहनशर्मा

कृषिप्रधानोऽस्माकं देशः। वर्तमानसमये जूनमासेऽपि ग्रीष्मस्य तीव्रतावशात् देशे शुष्कतावर्धत। कर्षकस्य दयनीया स्थितिः। कृषिक्षेत्रे परिष्कारस्यावश्यकता विद्यते। परन्तु नवीनसर्वकारस्य सम्मुखे अत्यन्तं काठिन्यमिदं विद्यते यत् वस्तुतः कृषिकर्मणा आयवृद्धिः कथं भवेत्। आर्थिकसर्वेक्षणानुसारं देशस्याधिकभागे एकस्य कृषकस्य वार्षिकायः विंशतिसहस्रंरूप्यकाणि विद्यते। ओईसीडी आईसीआरआई ई संस्थाया अध्ययनानुसारं कृषेः समुचितमूल्यप्राप्त्यभावात् वर्ष 2000 तः 2017 तमवर्षमध्ये कृषकानां 45 पंचचत्वारिंशत् लक्षकोटिरूप्यकाणां हानिर्जातः।

एतावदेव न अधुना कृतेनैकेन नवीनाध्ययनेन विगत पचदशवर्षेषु आयस्य स्तरो न्यूनतमो विद्यते। ग्रामेषु लोकेभ्यः कार्याभावो ववृधे। कृषकः परिश्रमं समधिकं करोति परन्तु पुनरपि प्रतिवर्षं कृषकपरिवाराणामार्थिक स्थितिः दौर्बल्यमेवागच्छत्। सत्यमिदं विद्यते सम्प्रति कृषिक्षेत्रं पूर्णरूपेण सामूहिकार्थिकनीतीनामाखेटो विद्यते। तेषामुद्देश्यं खाद्यसामग्रीणां मूल्यं न्यूनमेव भवेदिति विद्यते। एतेन उद्योगेभ्य अपरिपक्वा (कच्चा) सामग्री सुमहर्घमूल्येन मिलेत्। ततश्चान्ताराष्ट्रियो व्यापारः निर्बाधरूपेण प्रचलेत्। व्यापारस्य कार्याणि कृषिक्षेत्र प्रतिकूलतावशात् 2011, 2012 तथा 2016-17 वर्षेषु सार्वजनिकनिवेशेषु नैयून्यं दृष्टम्। सकलगृहोत्पादनं (जीडीपी) 0.4 प्रतिशतमभूत्। अस्मिन्नेव समये निजीक्षेत्रेस्य निवेशोऽपि 1.8 प्रतिशतमभवत्। 2016-17 वर्षेषु सार्वजनिकनिजीक्षेत्रयोर्निवेशः (जीडीपी) द्वाविंशप्रतिशतमभवत्। एतेन कृषिक्षेत्रस्योपेक्षा स्पष्टं प्रतीयते। प्रतिदिनं कृषका आत्महत्यां कुर्वन्ति। पंचनदप्रान्ते 2018 ख्रिष्टाब्दे प्रत्येकस्य कृषकस्य लक्षद्वयात्मकं ऋणं क्षमामाध्यमेन समाप्तं कृतम्। परन्तु भारतीयकिसानयूनियनस्य प्रतिवेदनानुसारं 430 कृषकैः आत्महत्या कृता। यदा कृषिसम्पन्ने पञ्चनदराज्य एषा स्थितिर्विद्यते तदान्यराज्यानां स्थितेः अनुमानं कर्तुं शक्यते।

2019 ख्रिष्टाब्दे कृषकसम्माननिधियोजनाया घोषणां कृत्वा सर्वकारः कृषिक्षेत्रे प्राणदानविचारं प्राचीकटत्। अनया योजनया भूस्वामिने कृषकाय 6000 षट्सहस्र-रूप्यकाणि वार्षिकं सर्वकारो दास्यति। एतेन ज्ञायते यत् सर्वकारः कृषकाणामायवर्धापने प्रत्यक्षं सहयोगं विदधाति। 14.5 कोटि कृषका अनया योजनया लाभमलभन्त। अन्येभ्यो भूमिहीनेभ्योऽतिशीघ्रमेवास्य लाभो दास्यते। एतेन 1.6 लक्षकोटिरूप्यकाणां बजट धनं देयं भविष्यति।

सर्वकारः कृषकाणाम् आयवृद्ध्यै कल्याणाय चैकं राष्ट्रीय-आयोगं संघटयेत्। आयोगः प्रतिमासं कृषक-परिवाराय 18000 अष्टादशरूप्यकाणामायं निश्चिनुयात्। मण्डलानुसारं प्रत्येकस्य आयमेकत्रीकृत्य समानाय-सिद्धान्तो निर्मातुं शक्यते। कृषि उत्पादकानां सुरक्षायै (मण्डी) संग्रहस्थानानां संख्या 7000 सहस्रतो वर्धाप्य 42000 सहस्त्रस्थानानि विधातव्यानि। देशे धानमण्डी गोदामानां च संख्यापि वर्धापनीया। सर्वकारं 25 लक्षकोटिरूप्यकाणि अग्रिमपञ्चवर्षेषु कृषिक्षेत्रे निवेशाय घोषणामकरोत्। अतः अस्मिन् वर्षे पञ्चलक्षकोटिरूप्य-काणां निवेशः कर्तुं शक्यते।

इदमपि ध्येयं कृषकाः मुख्यरूपेण कष्टमनुभवन्ति प्रशासनसम्बन्धि। यथा यथा व्यापारे व्यापारसम्बन्धि गतिविधीन् सरलं विधातुं प्रयत्ना विधीयन्ते तथैव कृषिक्षेत्रे कृषि सम्बन्धिनो नियमाः सरलाः करणीया एतेन वणिक्पथे कृषिउत्पादनसमागते गर्दनच्छेदप्रतिस्पर्धा समाप्तिं यास्यति।

वित्तमन्त्रिणात्र प्रयत्नो विधेयः।

# विनायकसहस्रसिद्धे

( गताङ्कादग्रे )

❑ पं. राजेन्द्रमोहनशर्मा

रात्रिरायाता चन्द्रस्तारागणश्चातिथेः स्वागतवेलाया-मतिथयोऽभूवन्। रात्रिकालिकाः पशवः पक्षिगणाश्च शब्दं कुर्वन्त मन्ये स्वकर्तव्ये नियोजिताः अभूवन्। आदिनायकः पौनःपुन्येनातिथिगणस्याभिवादनं विधाय रात्रिविश्रामहेतोः न्यवेदयत्। ते स्वकक्षेष्वगमन् तदा विनायकः इदं दृष्ट्वा आश्चर्यचकितोऽभवत् यद् विभिन्न-द्रव्यैस्तमस्नापयन्। तानि सर्वाणि एकस्मिन् प्रस्तरगर्ते संपतिताम्बु अवर्तत। आदिवासिनां समूहाः स्वकीयेषु मृत्पात्रेषु तत् पूरयित्वा नयन्तिस्म। विनायको मूषक-मपृच्छत् एते स्नानकृतां सामग्रीं किमिति नयन्ति? मूषकस्य जिह्वायां तस्य कषायफलस्यास्वादः सम्प्रत्यपि स्थित आसीत्। तदीया वाणी अपि तेन कषाया संजाता। स अवदत् एते इमां सामग्री स्वक्षेत्रेषु विकरिष्यन्ति। विनायकः शिरः परिवर्तनं विधाय मूषकमपश्यत् तदीय पृष्ठे च मुष्टिकाप्रहारं कुर्वन्नवदत् त्वमधुनापि कटुफलं स्मरसि त्वं न जानासि मदीयां स्वीकृतिं विना भवते तदनन्तरं स्वादिष्टानि मधुराणि व्यंजनान्यपि नामिलिष्यन्।

स्मितानन: मूषकोऽवदत् जानामि भवतां परिहास वृत्तिः कदापि न गमिष्यति। अस्तु सत्यं वदतु यदा भवन्तं शहददुग्ध दधि इक्षुरसैः स्नापयन्तिस्म तदा जिह्वया तेषामास्वादनेच्छा न जाता किं भवताम्? मूषकः अपृच्छत्। विनायको हसन्नवदत् एतादृक् कार्याय तु भवान् मदीयपार्श्वे समुपस्थित आसीदेव। भवता मदीय-प्रश्नस्योत्तरं नैव प्रदत्तम्। स पुनः मूषकमपृच्छत्, परन्तु मूषकस्तु स्वयं न जानातिस्म यत् स्नानानन्तरं गर्ते पतितां सामग्रीं किमिति वनवासिनो नयन्ति। परन्तु स स्वकीयमज्ञानं गोप्तुं कुशलोऽविद्यत। मूषकोऽन्यां वार्तां प्रारभत-अवदत् चलन्तु समधिका रात्रिर्व्यतीता शयनं विधातव्यम्। वयं सूर्योदयात् प्रागेवेन्द्रपर्वतखण्डं त्यक्ष्यामः। विनायकः आम् इत्युक्त्वा शीघ्रमेव स्वास्तरणे गत्वा अस्वपत्।

प्रातश्चन्द्रस्यास्तगमनात् पूर्वमेव विनायकः मूषक-माह्वयत्। चलितव्यम् अन्यथा विलम्बो भविष्यति। बहिरागत्यावलोकयत् सर्वे गणसमूहाः स्वकीयाश्वैः सह समुपस्थिता आसन्। विनायकस्य श्वेतमश्वं लक्षः गृहीत्वातिष्ठत्। तस्य पृष्ठभागे एव एकः श्याम-वर्णोऽश्वोऽपि अतिष्ठत्। तम् एको गणः मूषकाय गृहीत्वा अतिष्ठत्।

विनायकः स्वकीयाश्वस्य पृष्ठं हस्तेन स्पृष्ट्वा कषां हस्ते गृहीत्वा उत्प्लुत्य अश्वपृष्ठे समुपाविशत्। सर्वतः प्रथमं लक्षः स्वकीयपञ्चगणैः सह अग्रे प्राचलत्। ततश्च हिनहिनाशब्दैः सह विनायकस्याश्वः प्राचलत्। तदीय-पृष्ठभागे मूषकः स्वकीयश्यामवर्णाश्वे स्थितोऽविद्यत। तदनन्तरमन्ते विनायकस्य द्विशतगणाः स्वकीयाश्वेष्वा-रुह्य पंक्तिबध्दा भूत्वा लयबध्दाः सन्तश्चेलुः। वसतेरन्ति भागात् पूर्वमेवादिनायकं सम्मुखे दृष्ट्वा लक्षस्तत्रैवातिष्ठत्। स स्वकीयमश्वम् एकतोऽनयत् शनैः शनैः विनायक-स्याश्वः आदिनायकसम्मुखे आगत्य अतिष्ठत्।

आदिनायकोऽवदत् अतिथे! वयं भवदीयमुपकारं पूरयितुमक्षमाः। परन्तु भवदीयमार्गोऽति दूरगामी वर्तते प्रलम्बो विद्यते मार्गे च भयङ्कराः हिंसका पशवः आदिवासिनां जातयः निवसन्ति। भयानकाः नागाः वर्तन्ते। अतः मदीय आग्रहो विद्यते भवद्भिः सह मदीयदूतान् धनुर्धराँश्च नयन्तु। यदि भवन्तः मार्गे भ्रमिता भविष्यन्ति तदा गहनादस्मात् काननात् बहिरेव गन्तुं न शक्ष्यन्ति। हिंसकसमूहैश्च परिवृता भविष्यन्ति। संकटे पतिष्यन्ति अतः मदीय आग्रहो वर्तते यद् भवन्तो मदीयधनुर्धरान् साकं नयन्तु।

पृष्ठभागे स्थिताय मूषकाय-आदिनायकस्यान्तिमं वाक्यं नैवारोचत। स उत्पुलत्याग्रेऽवर्धत। परन्तु विनायकः सर्वमात्मना सम्भालयत्। विनायकः विनम्रतापूर्वकम् आदिनायकम् अवदत् वयं सर्वं सम्भालयिष्यामः। भवन्तश्चिन्तां त्यजन्तु। किन्तु आदि-नायकस्य प्रेमपूर्णमाग्रहं विनायको नैवारुणत्। अन्ते च आदिनायकेन नियोजितान् विंशतिसंख्याकान् पुरुषान् विनायकः स्वीचकार। किञ्चित् कालानन्तरं परिज्ञातं यत् तेषु पञ्चपुरुषा एतादृशा आसन् ये काननस्य तं मार्गमजानन् येन मार्गेण क्रूराः वन्यपशवः सारल्येन मार्गे चलन्तः शतं योजनानि इतस्ततः परिभ्रमन्तिस्म। यदा सम्पूर्णे वनक्षेत्रे घनघोरवृष्ट्याा गभीरासु खातासु कासारेषु नदीषु जलजालं व्याप्नोतिस्म तदापि इमे सम्मानने कुशलाः पथसंचरण-कर्तारः मार्गमन्विष्याग्रेगन्तुं परावर्तितुं च सक्षमा अविद्यन्त। शेषा दश धनुर्धराः ध्वनिं श्रुत्वैव स्वतीरेण हिंसकान् तत्रैवादनन्। शेषाः पञ्चसंख्याका आदिवासिनः संकटे खाद्यवस्तूनां विश्लेषणं विधाय जीवनयापनाय समुचितां खाद्यसामग्रीं न्यश्चिन्वन्।

विनायक एभिः सह अग्रे प्राचलत्। सूर्यस्य प्रथम-किरणेन साकमेव हिमखण्डेन सम्पृक्तेभ्य आवसथेभ्यः स्त्रियः पुरुषाश्च बहिरागत्य विनायकस्नानानीतेन जलेनाचमनमकार्षुः। हस्तं च मस्तकेनास्पृशन्। अग्रेसरो लक्षः सर्वे सहयात्रिणश्च दृश्यमिदमपश्यन्। विनायको यदा निकटमागच्छत् तदा लक्षस्तमकथयत्। दृष्टं भवता, अद्य इमे सर्वे आदिवासिनः स्वदिनचर्यां पंचामृतेन प्रारम्भन्त। विनायकः आश्चर्यमग्नः संजातो यदिमे आदिवासिनः तदीयस्नानाय प्रयुक्तवस्तुजातस्य प्रयोगं अनेन रूपेण कुर्वन्ति। स तेषामादरभावं दृष्ट्वा द्रवितः संजातः।

विनायकः सरलेभ्य आदिवासिमूहजनेभ्यः स्वमनसि अत्यधिकं स्नेहमन्वभवत्। एतेषामनौपचारिकसहज-सरलजीवनशैल्या सहात्मानं संलग्नमन्वभूत्। साकमेव चलन् मूषको ध्यानेन लक्षस्योद्बोधनमशृणोत्। स तारस्वेरणावदत् विनायक शृणोतु गतदिवसे भवानपृच्छत् यदस्य स्नानयुक्तस्य मिश्रणस्येमे किं विधास्यन्ति? तर्हि मित्र! शृणोतु इदं पंचामृतनामा विद्यते। श्रवणकाल एव विनायको जहास। **( प्राचार्य )**

**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# कबीराऽऽवाहनम्

❑ **मिश्रोऽभिराजराजेन्द्रः**
**राष्ट्रपतिसम्मानितः**

अवतर पुनर्भारते साधो !
हे कबीर! कटुवचनवीर! कथमिह विलम्बसे साधो!!

किं किं भवति भारते तवके, पश्यादागत्य दयालो!
मोदि-शासिते भारतराष्ट्रे पुनरुत्थिते, कृपालो!!

टाटा-बिरला-डालमियासम्पदोऽप्यहोतिशयाना!
दलितपुत्रिका नक्रदृग्जला विलपति शिरो धुनाना!!

मुसलपर्व यदुवंशे जातं मिथः प्रहृत्य विनष्टाः
कापिशायिनीमदमत्तास्तेऽप्यनवाप्यात्माभीष्टाः!!

छिन्नमस्तका काऽपि हि नृत्यति पावनवङ्गधरण्याम्!
संस्कृतिधर्मकलागीतावनिमपि विदधानाऽरण्याम्!!

सहजसमाधिमहोऽभ्यस्यति ते, ससूनुराशारामः
रामरहीमोऽप्यसौ सेवते कारासुखमभिरामः!!

तव दीक्षागुरुरप्यद्वैतः स्वामी रामानन्दः
शतसंख्यो जातोऽसौ देशे, भविता कस्ते वन्द्यः!!

परिचिनु तमुपायैर्भुवि साधो ! इतरय किल तमसाधोः
अवतर पुनर्भारते साधो!!

**शिमला।**

# स्वरमङ्गलायां प्रकाशितछन्दमुक्तरचनानां साहित्यिकसमीक्षणम्

❏ भंवरलाल शर्मा

कालक्रमेण हिन्दीभाषायाः साहित्ये विकासः अभवत् तत्र नूतनाः विधाः प्रयुक्ताः कविभिः तत्र कैश्चित् कविभिः स्वभावकाव्यस्रोतस्विन्यः छन्दतट-बन्धान् खण्डयित्वा प्रवाहिताः अस्याः नूतनविधायाः नाम तत्र ''नवीना कविता'' विश्रुतम्। हिन्दीभाषायाः काव्यप्रवृत्तिमनुसृत्य संस्कृते अपि नूतनैः कविभिः एषः मार्गः अवलम्बितः तथा च संस्कृते छन्दमुक्तरचनाः लेखिताः। स्वरमङ्गलाप त्रकायामपि युगप्रवाहं प्रभावं ज्ञात्वा एतासां प्रकाशनाय स्थानं प्रदतम्।

अत्र संस्कृतवाङ्मये मर्यादोल्लङ्घनम् अभवत् इति न वक्तव्यं संकुचितमनसा यतोहि भाषायां विकारः न भवति विकासः भवति। साहित्यं समाजस्य दर्पणः अस्ति अतः समाजस्य नूतनाः प्रवृत्तयः साहित्ये समाविशन्ति एव इति आवश्यकम् अपरिहार्यम् एव। अतः छन्दमुक्तरचना न काव्यम् इति न वक्तव्यम्। किं च-

''वाक्यं रसात्मकं काव्यम्'' इति काव्यस्य परिभाषायां सुधीभिः कुत्रापि न योजितं यत् ''छन्दोबद्धं वाक्यं काव्यम्'' वस्तुतः काव्यस्यात्मा रसः इति सर्वैः स्वीकृतम् तदेव गद्यं काव्यं स्वीकृतम् गद्यपद्ययोः मिश्रितं चम्पूः भवति। किन्तु गद्यमेव पद्यगुणसमाश्रित्य नूतनेन प्रकारेण अन्त्यानुप्रासेन तु कान्ततया लिख्यते तन्नाम नूतना कविता। अतः 'नूतना कविता' साहित्ये सर्जने नूतना विधा आविष्कृता नवयुगे। यत्र पद्यमिव लयात्मकता तु भवति किन्तु गुणानां वर्णानां वा मात्राणां नियमः न भवति तत् नाम नूतना कविता।

**''गद्यं कवीनां निकषं वदन्ति[2]''**

अग्रे पश्यामः काश्चन रचनाः छन्दोबन्धमुक्ता अपि भावप्रवाहिका अर्थगहनाः सुपेयाः सन्ति।

**1. बाधति तथा न बाधते**

**रचनापरिचयः** - इयं नवीना कविता छन्दोमुक्ता अस्ति अस्याः रचनाकारः प्रवीणपण्ड्या अस्ति। कविरसौ राजस्थाने जालौरजनपदे सांचौरक्षेत्रे ब्राह्मणवासग्रामे वसति। इयं कविता 2006 ईशवीयाब्दे अप्रेलजूनमासानां 31 वर्षे 2 अङ्के 2 पृष्ठे प्रकाशिता।

अत्र कविः वर्णयति मां वैयाकरणधौरेयमपि 'बाधति' शब्दः तथा न बाधते यथा स्वकं कर्मजातं पर्याप्य आप्तकामेन त्वया हे सखे! पूर्वकृतं पणं भङ्क्त्वा पणावधिमध्य एव वृत्तिमपहाय मध्येधारं मज्जनभीताय मह्यं त्यागाय उपदेशः कृतः। एषः उपदेशः बाधते। पणभङ्गस्य दोषः कस्य इति जानद्भिः सूरिभिः मौनम् अवलम्बितम् एतत् मौनं बाधते। हे कमले बाधति तथा न बाधते यथा मन्मुखाद् ग्रासं निपात्य द्वारिद्वारि जीविकायै अटतोर्मदक्ष्णोः पुरत एव दानस्याडम्बरः कृतः एषः दानाडम्बरः मां बाधते।

**साहित्यिकसमीक्षणम्** - अत्र 'बाधति' अशुद्धः शब्दः व्याकरणधौरेयं बाधते यथा तदपेक्षया अधिकं ''त्यागाय कृतः उपदेशः'' पणभंगदोषः तथा सुधीनां सत्यभाषणे स्वीकृतं मौनं तथा च ''मिथ्याडम्बरः'' मानसं बाधते इति भावपूरणा इयं कविता अत्र अयं ध्वनिः अभिव्यज्यते। ध्वनिप्राधान्यत्वात् इयं कविता उत्तमं काव्यम् अस्ति। अत्र हृदयस्य कष्टं कारुण्यरसम् उद्भावयति यथा अवलोकनीयः एषः पाठः-

**कमले! बाधति तथा न बाधते**
**मन्मुखाद् यथा ग्रासं निपात्य**
**द्वारि द्वारि जीविकायै अटतोर्मदक्ष्णोः पुरत एव**
**कृतो दानस्याडम्बरो मां बाधतेतमाम्।।**

अत्र करुणरसः उच्छलति अतः रसपूर्णा ध्वनि-गर्भिता इयं रचना उत्तमं काव्यम् इति।

**2. प्रार्थये तावत् हे राष्ट्रपितः**

**रचनापरिचयः** - इयं नूतना कविता डॉ. ताराशङ्कर-शर्मणा रचिता। एषः कविः जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालये जयपुरे साहित्यविभागे आचार्य अविद्यत। इयं रचना स्वरमङ्गलापत्रिकायाः 2006

1. साहित्यदर्पणे। 2. बाणभट्टेन उक्तम्।

ईशवीयाब्दे जुलाईसितम्बरमासानां 31 वर्षे 3 अङ्के 51 पृष्ठे प्रकाशिता।

अत्र कविः ताराशङ्करः भारतमातुः दुर्दशां वर्णयन् कथयति यत् सर्वेषां कर्णौ अभितः क्रन्दनं किन्तु केनापि न श्रूयते अथवा श्रुत्वापि कोऽपि अवगन्तुं नेच्छति कस्यायं क्रन्दनं एषा स्वार्थसमीहकैर्लोलुपदृशा वीक्ष्यमाणा सुवर्णं कुवर्णं कुर्वद्भिः चौरैः इव, व्यभि-चारिभिः लोलुप्यमाना, बलात्कारिभिः बलात्क्रियमाणा, आतङ्कवादिभिः आतङ्किता चीत्कुर्वती कमपि किमपि कथयितुम् इच्छति परं अस्याः क्रन्दनं चीत्कारं श्रोतुं कस्यापि शुश्रूषा नास्ति न च श्रोतुम् अवकाशोऽस्ति। अतः एवमेव यत्र तत्र सर्वत्र परिभ्रमन्ती श्रान्ता क्लान्ता सहायहीना दीना मीना इव विश्वस्य कस्मिंश्चित् कोणे तिष्ठति। कातरनेत्रम्लानमुखी मूकीव सर्वत्र स्वार्थमयं सर्वं व्यवहारजातं विलोकयति। एषा मम जननी जन्मभूमिः अस्ति या मे जन्मभूमिस्वतन्त्रतारते अपि सुरक्षिता अपि असुरक्षिता एवमेव सुरक्षितेषु अपि सुरक्षिता नैव विलोक्यते। अथवा असु-रक्षिता मात्रमेव दृश्यते। अस्मात् कारणात् मम आत्मानं चिक्करोति अहं असहायः बालकः अहं किं करवाणि। मे राष्ट्रपिता देवलोकातिथिः संजातः अतः तावत् प्रार्थये हे राष्ट्रपितः पथभ्रष्टान् सहोदरान् अग्रजान् भ्रातृन् मे सदाचारं शिक्षय सद्बुद्धिं देहि। येन संरक्षिता मदीया जननी जन्मभूमिः मानवती, मानववती मानवतावती च स्यात्।

साहित्यिकसमीक्षणम् - इयं रचना अलङ्कारैः सुशोभिता। शोभा यथा

**''एवमेव यत्र तत्र सर्वत्र परिभ्रमन्ती**
**परिश्रान्ता क्लान्ता**
**सहायहीना दीना मीना इव [2]''**

यमकालङ्कारप्रयोगः तथा विरोधाभासस्य प्रयोगः-

**सुरक्षितः अपि असुरक्षितः वर्तते**
**तथा असुरक्षितापि सुरक्षिता नैव**
**एवमेव सुरक्षितेष्वपि सुरक्षिता नैव विलोक्यते**
**अथवा असु-रक्षितामात्रमेव दृश्यते।**

1. वर्ष-31, अंक-2, पृष्ठ-2, चरण-3
2. वर्ष-31, अंक-3, पृष्ठ-51

इयं रचना भारतीया राष्ट्ररक्षणाय प्रेरयति। अतः भावगभीरा भारतीयकरुणां प्रकटयमाना अर्थगाम्भीर्येण युक्ता वीररसोद्भाविका कुत्रचित् कारुण्यस्यापि आविष्कारिका रसपूर्णा रचना अस्ति तथा उत्तमं काव्यम् अस्ति इत्यलम्।

**3. स्वतन्त्रतायाः संरक्षायां इमे प्रमाणाः**

**रचनापरिचयः** - इयं रचना आचार्यनटवरलालजोशि-महाभागानाम् अस्ति इयं नूतना कविता छन्दोमुक्ता इयं नूतना कविता स्वरमङ्गलायां 2007 तमे वर्षे अप्रेलजून-मासानां 32 वर्षे 2 अङ्के, 12 पृष्ठे प्रकाशिता।

इयं रचना खण्डद्वये अस्ति। यथा- ये सन्नद्धाः संलग्नाश्च प्राणपणेन स्वतन्त्रतायाः संरक्षसयां, सीमारक्षक-हेतवे, कालनिशायां हिमगिरिशिखरे रिपुदलनं कृत्वा वै प्रेषणाय यमसदनं ये समुत्साहवन्तः सततं ये हिमातिपातं नहि गणयन्ति, हिमप्रभञ्जनं तृष्णाम् अथवा तीव्रबुभुक्षाम् अथवा प्राणप्रियाणां प्रियस्वजनानां ममतायाः ऋजुकुटिल-बन्धनं, समन्ततः प्राणभयं त्यक्त्वा केवलं मातृभूमि-उत्कर्षहेतवे राष्ट्रकेतवे समर्पिताः सन्ति। इमे समर्धाः श्रद्धाभरिताः प्रणामाः तेषां वन्दनस्तुतिसमर्चने सीमा-रक्षकवीरहे तवेदुर्घणाणां वीरवराणां स्तुतिसमर्चने सीमारक्षकवीरहेतवे सन्ति।

द्वितीयखण्डे वर्णितं यत् ये पूर्वस्याम् अथ प्रतीच्यां दक्षिणदिशि वा चोत्तरदिशि, स्थले जले वा गगने सन्ति ये सागरस्य तटसंरक्षायां सन्ति। ये प्रतिक्षणम् अवधानपराः यमदंष्ट्रायां पतिताः यमं सावज्ञोपहसन्ति। ते विचक्षणाः चोत्कटधैर्यशालिनः साहसस्य प्रतिरूपधारिणः ये पौरुषस्य मूर्तस्वरूपाः शक्तिपूजकाः सत्वशालिनः युधि दक्षाः विकराल-स्वरूपाः शत्रुहेतवे कालभैरवाः सौम्ययुवानः तथा च प्रौढाः ये च मार्गदर्शकाः सन्ति गुल्मनायकाः सेनापतयः वीरसैनिकाः अथवा ये जनतायां त्यागवृत्तयः राष्ट्रसेवकाः सन्ति, वरं ते अंगुलिगणनीयाः स्युः तथापि अहर्निशं संघर्षकारिणः सन्ति तेषां धन्यमहिमशालिनां मर्यादायाः पुण्यसेतवे इमे प्रणामाः, जनतन्त्रस्य गरिमा रक्षकवीर-हेतवे तथा च ये प्राणपणेन स्वतन्त्रतायाः संरक्षायां सन्नद्धाः संलग्नाश्च तेषां वन्दनस्तुतिसमर्चने इमे प्रणामाः।

**साहित्यिकसमीक्षणम्**- इयं नूतना कविता तथापि अस्य प्रथमखण्डे भाषायां प्रवाहशीलता गेयता अस्ति। सम्पूर्णरचनायां वीररसस्य उत्स्फूर्तिः भवति। राष्ट्र-रक्षकाणां प्रति गौरवभावोऽभिवर्धते। राष्ट्रप्रेयभावना दृढतरा भवति अतः इयं रचना मनोहरा अस्ति। हृद्या अपि अस्ति। यद्यपि अत्र उक्तवैचित्र्यं नास्ति। ध्वनिव्यञ्जकता अपि नास्ति न च अलङ्कारशोभा विद्यते। तथापि प्रसादगुणयुक्ता वीररसोत्कर्षकारिका इयं रचना मध्यमं काव्यम् अस्ति न तु चित्रं काव्यम् इत्यलम्।

**4. अन्योक्तयः**

**रचनापरिचयः** - इमाः अन्योक्तयः डॉ. राजेन्द्रमिश्र-महोदयानां सन्ति। एषः कविः हीरापुराक्षेत्रे जयपुरे वसति। इमाः अन्योक्तयः स्वरमङ्गलापत्रिकायाः 2007 तमे ईशवीयाब्दे अक्टूबर-दिसम्बरमासानां 32 वर्षे 4 अंके 10 पृष्ठे प्रकाशिताः अत्र 10 अन्योक्तयः प्रकाशिताः।

**साहित्यिकसमीक्षणम्**- इमाः अन्योक्तयः गूढार्थकाः सन्ति अतः ध्वनि-प्राधान्यत्वात् उत्तमं ध्वनिकाव्यम् इति संज्ञा योग्याः सन्ति अत्र कविः वर्णयति यत्।

(1) यः प्रातः समीरणः अमन्दं गन्धं वहन् गर्वं वहन् च वियति मन्दं गच्छति तस्य शाखाचयात् कुसुमावलीनां विनिपातनं किं युज्यते? अर्थात् यः गुणवान् धीरवीरोऽस्ति तेन दुष्कृत्यं न करणीयं तस्य कृते दुराचरणं न शोभते।

(2) हे मौकुलेय तव मनो विमोहो भाति यत् त्वं मदीयमिति कोकिलेयम् रक्षसि। किन्तु संजातपक्षतिः अयं चपलः पुनः त्वां त्यक्त्वा एति किं ते अस्य परवञ्चकता न विदिता। अर्थात् मनुष्यममता भावनया पुत्रपौत्रान् पालयति किन्तु सर्वे स्वार्थिनः पितरौ त्यक्त्वा स्वैरं जीवनं जीवन्ति अतः मानवः ममतायाः मिथ्यामोह-पाशे न पतेत्।

(3) धाराधरो प्रकामं ध्वनति वर्षति, तीव्रः प्रभञ्जनः चापि अनिशं प्रवहति कटकटासहिता विद्युत् च देदीप्यते तथापि नगेश्वरः धन्यः यतः न हि कम्पते। अर्थात् कामं कीदृशम् अपि भयं घोरं संकटं भवेत् धीरवीरः न भयात् स्वमार्गात् विचलितः भवति न धैर्यं त्यजति च।

(4) एषा वल्लरिधन्या यतोहि पयोमुचिवर्षमाणे, प्रभञ्जनरवेण विशीर्णमानशाखः तरुः अजायत किन्तु आन्दोल्यमानवपुषा त्वया सहसा स्वाधारभूतः एषः तरुः न मुच्यते। अर्थात् स्वस्वामिनि कष्टे पतितेऽपि सुसेवकः आपत्तिकाले स्वाश्रयदातारं न त्यजति विपत्तिकालेऽपि तेन सह कष्टं सहते।

(5) भो ! पयोद ! वसुन्धरां सिक्त्वा त्वं नीहारपुञ्ज इव पाण्डिमानं गच्छति तस्मिन् क्षणे चाटुकारः प्रियचातकोऽपि ते सकाशम् उपसर्पति। अर्थात् सिद्धे प्रयोजने अस्मिन् स्वार्थाधारिते जगति न कोऽपि सम्बन्धं रक्षति। यावत् स्वार्थपूर्तेः सम्भावना भवति तावत् एव जगति कोऽपि प्रेम करोति स्वार्थं विना कोऽपि प्रेम न पालयति।

(6) नाम्ना एव नीरधिः इति अवगम्य कोऽपि पिपासां पूरयितुं न व्रजतु सागरं प्रति। अपेयसलिलैः क्षारैः परिपूरितत्वात् अस्य लवणाकराख्या लोके किं न विदिता। अर्थात् धनी इति प्रसिद्धिं कस्यापि श्रुत्वा कोऽपि याचनार्थं तस्य पार्श्वे न गच्छेत् यतो हि यः उदारगुणपूर्णः भवति सः एव दातुं शक्नोति यः गुणरहितः धनिकः भवति सः याचनां पूरयितुं न शक्नोति।

(7) रे राजहंस यस्य अम्भोरुहाणि सलिलं च निषेव्य भवता स्वनिखिलः समयः समोदं नीतः सरसि तस्मिन् घर्मनिदाघेषु शोषं गते त्वं परीक्षणीयः भवितासि। अर्थात् संकटकाले एव सुखस्य कालस्य मित्राणां परीक्षा भवति। यदिते संकटकालेऽपि सहवासं न त्यजन्ति तदेव ते सन्मित्राणि अन्यथा सुखकाले तु स्वार्थाधारितानि मित्राणि बहूनि भवन्ति।

(8) क्षारं जलं विविधधातुकजन्तुजालं, कुक्षौ तुङ्गाश्च वीचिनिवहान् समीक्ष्य एव हे मित्र! सिन्धुं किम् इति निन्दसि। यतो हि अमुना एव अधुना जलधरैः धरा सिक्ता। अर्थात् कस्यचित् दुर्गुणाः न भवन्ति। इयं सृष्टिः गुणदोषमयी अस्ति।

(9) वसन्तसमये प्राप्ते समुपागतासु ज्योत्स्नाप्रवाह-भरितासु च यामिनीषु खिन्नः तव सखा त्वया सदयं सुसेवितः मनोभूः मलयवाह रे धन्यः असि। अर्थात् दुष्टं अपि यः सदयं सुसेवते सः महान् भवति। दुष्टस्य संकटे तं सदयं यः सेवते सः महापुरुषः भवति।

(10) पयोधेः क्षारं जलं निजामृतरसैः मधुरं कुरु इति

हे देवि गंगे किमिति दृप्यसि। भवतीव मत्त्वा नदीशतमम् इमं यातं कल्लोलवेल्लितमभूत्-लवणीकृतं च। कोऽपि सज्जनः दुर्जनं सज्जनं कर्तुम् इच्छति किन्तु सः शतं दुष्टैः सहवासं कृत्वा दुर्गुणपूर्णः भवति तदा सज्जनस्य प्रयत्नाः अल्पाः भवन्ति।

एवं प्रकारेण उक्ति चित्र्येण ध्वनिप्राधान्यत्वेन अन्योक्ति अलङ्कार-शोभितत्वेन इमाः अन्योक्तयः उत्तमं काव्यम् इति वक्तुं शक्नुमः।

**5. मधुमयी धरायाः धूलिः**

**रचनापरिचयः** - इयं नूतना कविता आशुतोषजोशी इत्याख्येन प्रस्तुता। कविः एषः गांधीनगरक्षेत्रे जयपुरे वसति तथा च संस्कृतशिक्षाविभागे कार्यरतः शेखावाटी-क्षेत्रस्य लक्ष्मणगढनगरवास्तव्यः अस्ति एषा रचना स्वरमंगलायाः 2008 ईशवीयाब्दे 33 वर्षे 3 अंके 22 पृष्ठे प्रकाशिता।

वस्तुतः इयं रचना कवीन्द्ररवीन्द्रनाथठाकुरस्य कवितायाः संस्कृतानुवादः अस्ति। अस्यां रचनायां कविः वर्णयति यत् अयं द्युलोकः मधुमयः। अस्याः धरायाः धूलिः मधुमयी। मया अयं महामन्त्रः हृदये धार्यते। तथा च जीवनस्य वाणी चरितार्था दिने दिने सत्यस्य यदुपहारः सम्प्राप्तः यत् तस्य मधुरस्य क्षयः नास्ति। अतएव मृत्योरन्तिमे तटे इयं मन्त्रवाणी गुञ्जति सर्वान् क्षतीन् मिथ्यां कृत्वा सत्यानन्दो विराजते। धरित्र्या अन्तिमस्पर्शं गृहीत्वा यदा गमिष्यते तदा कथयिष्ये भाले तव धूल्याः तिलकं कृतम्। दुर्दिनस्य मायायाः परिच्छिन्ने मया नित्यस्य ज्योतिः अवलोकितम्। इयं धूलिः सत्यानन्दरूपे आकारं गृहीतवती इदमेव ज्ञात्वा अस्या धूल्यां स्वकीयः प्रणामः न्यस्यते।

**साहित्यिकसमीक्षणम्**- कवीन्द्रस्य रवीन्द्रस्य साहित्यिकसमीक्षणं कर्तुं किं वयं योग्याः स्मः तथापि अवसरे उपस्थिते कर्तुं प्रयासं कुर्मः। अत्र कविः भूमेः महत्त्वं प्रतिपादयति। इयं प्रकृतिः एव ईश्वरस्य स्थलं रूपं नान्यत् द्युलोकः मधुमयः पृथिवी व मधुमयी कविः कथयति अयं मया जीवनस्य मन्त्रः स्वीकृतः तथा च तदनुकूलं प्रकृत्याः रक्षणं पोषणं संवर्धनं सुसेवनं मया कृतम्। कविः वर्णयति मम जीवने दिने दिने अयम् अनुभवः आयातः यत् अस्याः धूल्याः मधुरतायां क्षयः नास्ति अतः कवि कथयति मृत्योः अन्तिमे तटे सत्यानन्दः अस्ति। वस्तुतः मायायाः परिच्छिन्ने नित्यस्य ज्योतिरूपेण इयं धूलिः आकारं गृहीतवती। अतः ईश्वरं मत्वा अस्यां स्वकीयप्रणामः न्यस्यते यथा-

**दुर्दिनस्य मायायाः परिच्छिन्ने मयाऽवलोकितं नित्यस्य ज्योतिः सत्यस्यानन्दरूपे धूलिरस्याम् आकारं गृहीतवती इदमेव ज्ञात्वा धूल्यामस्यां स्वकीयप्रणामः न्यस्यते।।**[1]

एवं रूपेण उक्तिवैचित्र्येण समन्विता इयं रचना यथा-

**चरितार्था जीवनस्य वाणी**
**दिने दिने सत्यस्य यदुपहारः सम्प्राप्तः**
**नास्ति तस्य मधुरस्य क्षयः**
**अतएव मृत्योरन्तिमे तटे गुञ्जति मन्त्रवाणीयं।।**[2]

अलङ्कारशोभिता ध्वनिप्राधान्यम् आवहति इयं रचना सहैव उत्तमकाव्य-संज्ञामपि आवहति। अत्र गूढदर्शन शास्त्रस्य सत्यं स्थलप्रतीकैः कविना सरसतया व्याख्यायितम्। अत्र छायावादिनां रीत्यनुगुणं प्राकृतिक-प्रतीकानां माध्यमेन "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"[3] इति कथ्यं तथ्यं प्रकारान्तरेण प्रकटिम् अतः उत्तमं काव्यम्।

**6. मृत्युञ्जयः** -

**रचनापरिचयः**- एषा नूतना कविता रवीन्द्रनाथठाकुरस्य अस्ति अस्याः संस्कृतानुवादम् आचार्यः नटवरलाल-जोशी लक्ष्मणगढवास्तव्यः प्रस्तौति।

अत्र कविः वर्णयति यत् दूरतः मया मनसि विचारितं यत् त्वं दुर्जयः असि त्वं निर्जयः असि तव शासने धरित्री अपि कम्पते। त्वं विभीषिका असि। दुःखस्य विदीर्णवक्षः स्थले तव लेलिह्यमाना जिह्वा अस्ति तव दक्षिण हस्तस्थत्रिशूलम् ऊर्ध्वम् भये न भीतः अहम् तव सम्मुखम् उपागतः। तत्कालमेव तव आघातपातः जातः तेन मत्पञ्जरः कम्पितः वक्षसि हस्तं धृत्वा मया पृष्टम् अधुना तव प्रहरकौशले किमपि अवशिष्टम् अस्ति। किम् अस्ति शेषः। अन्तिमः वज्रपातः अन्तिमः आघातोऽपि बभूव किम् एवावदेव? अन्यत् किम् अपि नास्ति। मम भयं दूरीभूतं यदा तव वज्रम् उपरि समुत्थितं मानितं मया त्वम् असि मत्तः महत्तरः।

**साहित्यिकसमीक्षणम्**- इयं रचना गूढदार्शनिकतत्त्वम् उपस्थापयति। भयात् मानवः पलायते तथापि भयं न दूरी-भवति। तस्य सम्मुखीभूत्वा भयं सहते तदा तस्य भयं दूरी भवति। एतत् सर्वे कवीन्द्रेण न्यस्तम्। किन्तु अत्र उक्तिवैचित्र्येण सर्वम् उपस्थापितं न सामान्यशब्दैः पश्यतु यथा-

**दुःखस्य विदीर्णवक्षःस्थले दहति तव**
**लेलिह्यमाना जिह्वा।**

तथा **यदा तव वज्रमुपरि समुत्थितम्।**
**मानितं मया त्वमसि मत्तो महत्तरः।।**[1]

अत्र अर्थगाम्भीर्यमस्ति, ध्वनिप्राधान्यम् अस्ति तथा च प्रकृति-प्रतीकमाध्यमेन दर्शनशास्त्रगततथ्यस्य वर्णनं कृतम् छायावादिनां मार्गमाश्रित्य अतः इदम् उत्तमं काव्यमस्ति इत्यलम्।

7. प्रथमदिवसस्य सूर्यः -

एषा रचना अपि आचार्यनटवरलालजोशीमहाभागेन संस्कृतानुवादिता कवीन्द्ररवीन्द्रनाथटैगोरमहोदयेन रचिता स्वरमंगलापत्रिकायाः 2009 तमे वर्षे जुलाई-सितम्बरमासानां 34 वर्षे 3 अंके प्रथमपृष्ठे प्रकाशिता अस्ति।

अत्र कविर्वर्णयति यत् प्रथमदिवसस्य सूर्यः अस्तित्वस्य नूतनाविर्भावं पृष्टवान् त्वं कोऽसि ? उत्तरं न मिलितम्। वर्षात्परं वर्षाः व्यतीताः दिवसस्यान्तिमः सूर्यः पश्चिमसमुद्रस्य तटे निस्तब्धस्थितां सन्ध्यामन्तिमं प्रश्नं पृष्टवान् त्वं का असि? उत्तरं न मिलितम्। परम् आघातेन समं त्वमधस्तादायातः यत्रास्ति मम आत्मस्वरः अद्य त्वं लघु जातोऽसि। तव सर्वा लज्जा अपगता। प्रकामं महानसि त्वम् नासि त्वं मृत्योर्महत्तरः। परम् अहमस्मि मृत्योर्महत्तरः इत्थं केवलम् अन्तिमं वाक्यम् उक्त्वा चलिष्यामि अहम्।

**साहित्यिकसमीक्षणम्**- इयं कविता प्राकृतिकप्रतीक-माध्यमेन छायावादिमार्गमाश्रित्य गूढदार्शनिकं तत्त्वम् उपस्थापयति लोकजीवनस्य। अत्र प्रथमदिवसस्य नूतनाविर्भावः युवावस्थायाः जीवनारम्भस्य प्रतीकं विद्यते। अन्तिमः सूर्यः वृद्धावस्थायां निस्तब्धिता सन्ध्या मरणासन्नस्थितेः प्रतीकभूता अस्ति। जीवः अस्तित्वम् अस्ति। अत्र वर्णितं यत् अहम् आत्मा मृत्योर्महत्तरः अस्मि। यतोहि जीवः यौवने बलवान् भवति किन्तु कालवशात् सः कृशकायः क्षीणप्रभः जायते मृत्युकालकवलिते तस्य अस्तित्वं नष्टं भवति किन्तु मम आत्मनः अस्तित्वं मृत्युः अपि नाशयितुं न शक्नोति। छायावादिमार्गाश्रयणत्वात् अर्थगाम्भीर्यात् ध्वनि-प्राधान्यत्वात् इयं कविता उत्तमं काव्यम् अस्ति। वाच्यार्थं विहाय लक्षणया सह व्यञ्जनाप्रधाना इयं रचना उत्तमं काव्यम् अस्ति। कविः नटवरलालजोशीमूलकवितायाः भावान् मौलिकरूपेण संरक्षयन् संस्कृतेऽनुवादं प्रस्तौति तदपि श्लाद्यं मौलिकरचना तु प्रशंसनीया भवति तथापि अन्यभाषाणां कालजयीकृतीनां संस्कृतानुवादेनापि संस्कृतसाहित्यं परिवर्धितं समृद्धं भवति।

**8. घनगर्जितम्** -

**रचनापरिचयः** - इयं रचना अपि डॉ. प्रकाशचन्द्र-पाण्डेयस्य नूतना कविता अस्ति। इयं कविता 2010 तमे ईशवीयाब्दे 35 वर्षे 1-2 संयुक्तांके जनवरीतः जूनमासानां संयुक्ताङ्के 38 पृष्ठे प्रकाशिता।

अस्यां कवितायां कविः नश्वरे जीवने अपि आशोल्लासं वितनोति कविः वर्णयति यत्-

**यदि वर्षाणां सन्ति पादाः मम अपि,**
**दीपयिष्यामि अहं मम दीपशिखाम्।**
**अथ मयाऽरेखिताः शिलालेखाः किल घनगर्जिताणाम्।**
**पराञ्चिखान्यनारतं विवदन्ति, संवदन्ति,**
**नश्वराण्यपि नो जातानि यदि वर्षा।।**[1]

अग्रे कविः पुनः वर्णयति यत्-

**शतशतकानाम्बरमणि शतसहस्र**
**नश्वराणि काननानि यदि वर्षा,**
**नश्वराणि काननानि विद्युतः सुमङ्गलघनाः**
**प्रखराश्च तरणिकिरणाः अथ प्रपातः।।**[2]

एवंप्रकारेण अर्थगाम्भीर्येण युक्ता ध्वनिप्रधाना छायावादिमार्गमाश्रित्य प्राकृतिकप्रतीकैः गूढदार्शनिक-

1. स्वरमंगला-वर्ष-33, अंक-3, पृष्ठ-22
2. स्वरमंगला-वर्ष-33, अंक-3, पृष्ठ-22
3. वाल्मीकिरायणे।

विषयस्योपस्थापिका इयं रचना उत्तमं काव्यम् अस्ति इयं कविता नास्त्यत्र संदेहः।

**9. अयि रमणि -**

**रचनापरिचयः** - अयि रमणि! इति शीर्षकेण स्वर-मङ्गलापत्रिकायाः 2010 ईशवीयाब्दे 35 वर्षे जनवरीतः जूनमासानां संयुक्तांके प्रकाशिता कविता अपि डॉ. प्रकाशपाण्डेयस्य अस्ति। अत्र कविः प्रकृतौ सर्वत्र रमणीयतां पश्यति विधातुः।

कविः वर्णयति यत् हे रमणि तव नवस्मितं वदनमण्डलं रमयति। अथ तव अधरोष्ठयोर्युग्मं यथा बिम्बम् अथवा बिम्बमिव तरणेरुषस्तमबेलायाम्, अस्मिन् अपराह्ने ममायुषः क्षपाऽविरायाति सायं भीतप्रभीतस्य इव शीतमयूखस्य प्रियतमा सायमेव चास्तमायाति। तरणिर्यथा तरक्षुः सकल्माषः तावदेव सकल्मषः यावत्स चन्द्रमाः ज्योत्स्नाभिरामा विसृमराऽथ व्याप्नोति स्वकां रोचिमभिख्यामयीम् तन्वीमथ व सुन्दरां क्षीरधवलां यथा, काऽपि कामधेनुरिव प्रस्रवतु नाम गोरसम् ईषच्छ्यामा अहं चापि निवृत्ते क्षणस्त्वपि ईषत्कामः। पुनश्च रमणि हे रमणि रामेऽभिरामे तवास्मि रमणीयं सर इव अथवा सरसीशतशतपुण्डरीक-काननमिव चन्दनमथ च नेत्रयुग्मं यत्राविरायातु सुषमा या सवाष्पाऽथ च तरलविरला, यथा कोऽपि उषस्यवश्याय वेला अस्ति अयि रमणि!

**साहित्यिकसमीक्षणम्**- अस्यां रचनायाम् अपि कविः बाल्यकालात् वृद्धत्वेऽपि तथा च प्रभाते मध्याह्ने सायंतने रात्रौ चन्द्रिकायां सरसि पुण्डरीकेषु सर्वत्र रमणीयताम् एव पश्यति मानवशरीरेऽपि रमणीयतां पश्यति तत् विधातुः सुन्दरं रूपं पश्यति। अतः गूढदार्शनिकविषयं प्राकृतिकप्रतीकैः उपस्थापिका हृद्या अलङ्कारपूर्णा ध्वनिप्रधाना इयं रचना उत्तमं काव्यम् अस्ति इति वक्तुं युज्यते। अनया कवितया संस्कृतवाङ्मयं संवर्धितम्।

**10. अन्ना**

**रचनापरिचयः** - इयं रचना अपि डॉ. प्रकाशपाण्डेयस्य अस्ति। रचनेयं स्वरमङ्गलायाः 2010 ईशवीयाब्दे 35 वर्षे जुलाईतः सितम्बरमासानां 3-4 संयुक्तांके 36 पृष्ठे प्रकाशिता।

अस्यां रचनायां कविः राष्ट्रसेवकस्य श्रीमतः अन्नाहजारे महाभागस्य वैशिष्ट्यम् उद्घाटयन् वर्णयति यत् मासान् यावत् अन्ना अन्नमपि निराकुर्वन् उपवासं कृतवान् सः अन्ना राष्ट्रसेवकः, राष्ट्रदूतः, राष्ट्रैकभावनाभितप्तः सूर्यः अस्ति। अन्ना भ्रष्टाचारनिर्मूलनसत्कार्यकर्ता पुरुषः तथा अन्ना सर्वेषां दरिद्रजनानां भ्राता अस्ति। अन्ना कारागृहान्निर्भीतः निर्भीकः गतभयः एक एव रक्षाध्वरविध्वंसक इव पुरारातिः स्वयं राष्ट्रम् अस्ति। अन्ना द्वारा एकोऽपि पक्षो न स्वीकृतः तेन यस्य कस्यापि पक्षस्य स्यात् किन्तु यः भ्रष्टाचारविनिर्मूलकः तादृशः राष्ट्रसेवकः आत्मीकृतः। अन्ना दशदिशां भ्राता। अन्ना अन्नं विना अपि मासान् यावत् सुजीवितः मृत्योः अपि स्थण्डिले समादृत्यैकः केवलः स्फुलिङ्गः, राष्ट्रैकसेवा-परायणः, लक्षलक्षकार्यकर्तॄणाम् आदर्शः अस्ति। अन्ना आदर्शदानउत्कोचन्नरकर्तृणाम् एकः समुल्लसयिता अस्ति।

सः एकः भास्वान् विवस्वान् क्षितिजे समुदयमानो-ऽपि सन् कोऽपि राष्ट्रैकदयितः तापसः येन युगानि यावत् च राष्ट्रसेवायै-ब्रह्मचर्यमपि स्वीकृतम्। तेन राष्ट्रसेवापि राष्ट्रहिताय राष्ट्रहितरक्षणाय अङ्गीकृता। राष्ट्रैकदेवाय गान्धिने च समर्चनायै सः अयम् अन्ना।

**साहित्यिकसमीक्षणम्** - इयं कविता अलङ्कारपूर्णा तु अस्ति तथापि अन्नाहजारेमहोदयस्य वैशिष्ट्यसूचक-शब्दानां संकलनम् अस्ति न तत्र उक्तिवैचित्र्यं न च अर्थगाम्भीर्यं किञ्चिदस्ति। अतः इयं कविता न उत्तमं काव्यमिति निःसन्देहं वक्तुं शक्नुमः।

**11. हास्यवन्दना**

**रचनापरियः** - इयं रचना डॉ. हर्षदेवमाधवस्य अस्ति अयं कविः गुजरातप्रान्ते गांधिनगरे जनपदे चांदखेडानगरे वसति। इयं रचना स्वरमङ्गलायाः 2010 ईशवीयाब्दे 35 वर्षे जुलाईतः दिसम्बरमासानां संयुक्ताङ्के 35 पृष्ठे प्रकाशिता।

अस्यां रचनायां कविः हास्यस्य वन्दनां कुर्वन् तस्य वैशिष्ट्यं वर्णयति यत् हास्यं सौख्यदं मिष्टं प्रसन्नं भवति

1. स्वरमंगला-वर्ष-34, अंक-2, पृष्ठ-1

1. स्वरमंगला-वर्ष-35, अंक 1-2, पृष्ठ-38
2. स्वरमंगला-वर्ष-35, अंक 1-2, पृष्ठ-38

धरणीतले येन हीनं जीवनं श्मशानतुल्यं कष्टदायकं भवति। यस्य हास्यम् अस्ति सः नरो गुणज्ञः भवति। सः पण्डितः, श्रुतवान् धनाढ्यश्च भवति। सः एव साधुः स च दर्शनीयः यतोहि सर्वे गुणाः हास्यनिधौ वसन्ति। हास्यं विभक्तं शुद्धं मुखसौन्दर्यवर्धनम् येन हीना मुखश्रीः म्लाना शिशिरमूर्छिता इव भवति। यः हास्याढ्यः स धनाढ्यः यः हास्यवान् सः आत्मवान् भवति। विना हास्येन दुष्टास्यः, तस्य दीर्घजीवितम् धिक् हास्यं ब्रह्मरूपं पुष्टिदं जीवनामृतम्, संसारे औषधं दिव्यं चिरं जीवि शुभं तं नुमः। जीवने यत् किञ्च शुभम् तत् सर्वं हास्यावास्यम् हे मूर्ख त्वं विषादं संत्यज्य प्रसन्नतां भुञ्जीथाः। हास्यं नर्मसंयुक्तं कटाक्षकरग्राहि यत् विध्यति हृदयं किन्तु भाति सञ्जीवनौषधम्।

**साहित्यिकसमीक्षणम्**- इयं रचना शब्दाडम्बरमात्रं सामान्यशब्दैः हास्यवैशिष्ट्यं वर्णयति। रचनायां प्रायः श्लोकाः पुरातनग्रन्थानां अनुकृतिप्रधानाः सन्ति। अतः इयं रचना न श्लाघ्या न रम्या न उत्तमं काव्यं इति निश्चयेन वक्तुं शक्नुमः।

**12. वर्तमानपत्रस्य लघुकानि विज्ञापनानि**

**रचनापरिचयः** - इयं रचना अपि डॉ. हर्षदेवमाधवस्य 2011 तमे ईशवीयाशब्दे स्वरमंगलायाः जनवरीतः जूनमासानां संयुक्ताङ्के 14 पृष्ठे प्रकाशिता।

**साहित्यिकसमीक्षणम्**- अस्यां रचनायां कविः पंचलघुकानि विज्ञापनानि प्रकाशितवान्। इमानि विज्ञापनानि हास्यक्षणिकावत् सन्ति। समाजस्य दशया उपरि व्यङ्ग्यं कुर्वन्ति। जनान् चिन्तयितुं बाध्यान् करोति।

एतानि पंचलघुकानि विज्ञापनानि मन्ये पञ्च परमाणुविस्फोटकानि सन्ति। यानि दूरं यावत् सहृदय-चेतासि प्रहारं कुर्वन्ति। ईदृशं काव्यं संस्कृतसाहित्ये दुर्लभम् आसीत् प्राचीनकाले। एतेन डॉ. हर्षदेवेन संस्कृतवाङ्मयस्य उपकारः कृतः साहित्यश्रीर्वर्धिता उत्तमं काव्यं हास्यरससमन्विते ध्वनिकाव्ये इयं रचना अस्ति नास्त्यत्र सन्देहः।

**13. अधुना**

**रचनापरिचयः** - इयं रचना अपि डॉ. हर्षदेवमाधवस्य अस्ति इयं रचना स्वरमङ्गलायां 2011 तमे ईशवीयाब्दे 36 वर्षे जुलाईतः दिसम्बरमासानां 3-4 संयुक्ताङ्के प्रकाशिता।

अस्यां सप्त परिभाषाः प्रस्तुताः कविना। नवयुगीन-साहित्यविधया कविना क्षणिकासु गम्भीरव्यङ्ग्यं कृतं समाजस्य दशायां, सर्वा परिभाषा यावत् मात्रायां लघुतमा अस्ति तावत् मात्रायाम् अर्थगाम्भीर्ययुक्ता अस्ति। यथा स्वगतं जनसामान्यस्य एकाङ्गित्वं व्याख्याति यथा-

**''केन सह कथां करवाणि मे व्यथायाः।**[1]**''**

प्रकाशनम् मनुष्यस्य चिन्तनं कथं दूषितम् इति व्यज्यते यथा-

**हे प्रियहृदयगोपितं किमस्ति, यत् कथयानि शनैः शनैः।**
**त्वं वाचयितुं शक्नोषि मम मौनमपि।।**[2]

समीपे शीर्षकेण मानवस्य व्यथिता दुर्दशा वर्णिता यत्

मानवस्य पुरतः वर्तन्ते शिरोरहिताः शंका, पृष्ठे वर्धते प्रतिछायाहीनं भयम्। मस्तके राजते ईश्वरप्रतीतिभ्रष्टं महाशून्यम्। अधोविस्तृता तलरहिता जिजीविषा। पार्श्वे स्थितः मानवतापरिचयशून्यः संसारः। दक्षिणे विद्यते वामत्वं व्यवहारस्य। वामतः श्रूयते वक्रतासम्बन्ध-कृतत्वमस्या दूरं गत्वा पुनः दर्शनात् दूरे प्रकल्प्यते। तव चरणचिह्नानुमानं समीपे लभ्यते। सामीप्यभवः। एवंप्रकारेण मानवजीवनस्य आधुनिककाले विडंबनाचित्रणेन मानवजीवनस्य उपरि व्यङ्ग्यं कृतं कविना। इयं कविता ध्वनिप्रधाना काव्यरचनायाः नूतना विधा उपस्थापिका गूढा अर्थगाम्भीर्य-युक्ता गभीरा अस्ति। नूनम् उत्तमं काव्यम् अस्ति इति निःसन्देहेन वक्तुं शुक्नुमः।

**अनुसन्धाता-साहित्यविभाग, ज.रा.राज.**
**संस्कृतविश्वविद्यालयः जयपुरम्,**
**व्याख्याता-हिन्दी**
**श्रीकल्याणराजकीयआचार्यसंस्कृतमहाविद्यालय,**
**सीकर**

1. स्वरमंगला-वर्ष-36, अंक 3-4, पृष्ठ-35
2. स्वरमंगला-वर्ष-36, अंक 3-4, पृष्ठ-35



# विशेषयोग्यजनसेवारता स्नेहलता

❑ शिवशरण नाथ त्रिपाठी

दिव्याङ्गजनानां पालनं पोषणं शिक्षा-दीक्षा च परमं तपो वर्तते। अस्मिन् कर्मणि सहनशीलतायाः संवेदनशीलतायाश्चानुपम संयोगः समपेक्षितो भवति। श्रीमती स्नेहलता शर्मा तादृश्येव काचिद् व्यक्तिर्वर्तते या विशेष शिक्षिकारूपेण दिव्याङ्गजनानां जीवनेन ज्ञानालोकं प्रसारयत्यपितु स्वस्नेहधारावर्षणेन तेषां नीरसजीवनं सरसं सम्पादयति। विशेषयोग्यजनानां शिक्षणानुकूलदृढनिश्चयशीला श्रीमती स्नेहलता जयपुरे 15-7-1975 दिनाङ्के जन्म गृहीतवती। राजस्थानविश्वविद्यालयतः एम.कॉम विशेषशिक्षायां शिक्षास्नातक (B.Ed.) उपाधीः भारतीय पुनर्वास परिषद् भारतसर्वकार नई दिल्लीतः फाउण्डेशन कॉर्स ऑन एजूकेशन ऑफ चिल्ड्रन विद लर्निंग डिसबिलीटी मनीपाल, कर्णाटकस्य विश्वविद्यालयतश्च विशेष शिक्षा-डिप्लोमा सेरेबल पॉल्सी (D.S.E.) समधिगतवती। श्रीमती स्नेहलता श्री देवेन्द्र कुमार शर्मणा सह यदा विवाहबन्धनं प्राप्तवती तदैव स्वेच्छया क्रमिकस्मृतिह्रासरूपमानसिकरोग (डिमेंशिया) पीडितस्य स्वश्वसुरस्य अर्बुद (केंसर) रोगपीडितायाः श्वश्वोश्च सेवादायित्वं स्वीकृत्य स्वोदारभावनायाः परिचयं प्रदत्तवती। परिवारस्य कृते समुद्भूतायाः सेवाभावनायाः समाजपर्यन्तं विस्तारं विधाय सा विशेषयोग्यजनानां शिक्षणेन तेषां कृते समुपलब्ध-सर्वकारीययोजनानां प्रचारकर्मण्यपि पूर्णमनोयोगेन संलग्ना सञ्जाता।

सेवासंसक्तहृदया सा नेत्रदानसङ्कल्पं विधायान्यानपि भृशं प्रेरितवती।

भारतीय रेडक्रोस-सोसायटी-संस्थाया आजीवन-सदस्या श्रीमती स्नेहलता प्राथमिक-उपचार-व्याख्यातृरूपेणापि समाजसेवासंलग्ना वर्तते। विंशतेरधिकासु कार्यशालासु भागं गृहीत्वा विशेषयोग्यजन-शिक्षोचितनवाचारशिक्षणं प्राप्य च महोदयैषा बहूनां दिव्याङ्गानां जीवनं सुखदं सफलं च वृतवती। विविधायामयुतव्यक्तित्वशालिनी श्रीमती स्नेहलता शर्मा लैङ्गिकापराधप्रकरणेषु यौनोत्पीडितबालकानां साहाय्यार्थं जिलाकलेक्टर कार्यालय द्वारा निर्धारितविशेषशिक्षक-समूहे सूच्यां सम्मिलिता सैषा महोदया राजस्थानपत्रिका टी.वी. दूरदर्शन आकाशवाणी, जयपुर द्वारा प्रसारितेषु विभिन्नकार्यक्रमेषु चापि दिव्याङ्गजनोपयुक्तचर्चा द्वारा प्रेरणास्पदसंदेशान् दत्तवती।

विशेषशिक्षाक्षेत्रे न केवलं राजस्थानेऽपितु सम्पूर्ण-भारते ख्यातिप्राप्ता श्रीमती स्नेहलता केसरी वरिष्ठ नागरिक क्लब एवं पंजाब केसरी, नई दिल्ली द्वारा राष्ट्रियस्तरे हाउस वाईफ वीमन अवार्ड (2011), वीमन ऑफ द फ्यूचर अवार्ड संस्था द्वारा अवार्ड (2017) शुभविचार संस्था, जयपुर द्वारा अन्ताराष्ट्रिय महिला सशक्तीकरण सम्मानः (2018) उम्मीद हैल्प लाईन फाण्डेशन, जयपुर द्वारा दिव्याङ्ग रत्नसम्मानः (2018) तथा चैकादश विविध राज्यस्तरीय सम्मानैश्चापि विभूषिता वर्तते। विभिन्नावसरेषु राजस्थानसर्वकारीयमन्त्रिभिः पुरस्कृता विभिन्नसंस्थाभिश्च सम्मानिता विशेषशिक्षिका श्रीमती स्नेहलता शर्मा दिव्याङ्गबालकशिक्षाक्षेत्रे सामाजिकसेवाकार्येषु विशिष्ट-योगदानाय राज्यस्तरीय सेवा प्रशस्ति पत्र प्रदानेन राजस्थानस्य तत्कालीन मुख्यमन्त्रिमहोदयया श्रीमत्या वसुन्धरा राजे महोदयया सम्मानिता।

महोदययाऽनया तदा नूनं राजस्थानस्य गौरवं संसारे सुवर्धितं यदा सा विशेष शिक्षादिव्याङ्गजनसेवा-सामाजिकसेवा-क्षेत्रेषु स्वानुपमयोगदानाय एण्टीकरप्शन फाउण्डेशन ऑफ इण्डिया द्वारा हिन्दी चलचित्राभिनेतुः रजामुरादमहोदयस्यान्येषां प्रतिष्ठित जनानां च गौरवमय्यां समुपस्थितौ हरियाणास्थ करनालनगरे 16.12.2018 दिनाङ्के एशिया प्राइड अवार्ड 2018 द्वारा सम्मानिता।

जन्मजन्मान्तरीयेण पुण्योदयेनैव सेवावसरः कश्चन केनापि प्राप्यते। तत्रापि दिव्याङ्गसेवारूपदिव्यावसरप्राप्तिस्तु नूनं महत्पुण्यपरिणामरूपैव। ''सेवाधर्मः परमगहनो योगिनामप्यगम्यः'' भर्तृहरिसूक्तं स्मरन् भारतीपरिवारो भूरिशोऽभिनन्दति श्रीमतीं स्नेहलताशर्मा महोदयाम्।

# संघर्षः

❑ डॉ. राकेश शास्त्री

एकस्मिन् नगरे एकः सम्भातः परिवारः वसति स्म। प्रातिवासिनः तं परिवारम् अतीव स्नेहं कुर्वन्ति स्म। तस्मिन् परिवारे त्रयः सदस्याः आसन्। एकः रामलालः, यः बैंकमध्ये वरिष्ठलिपिक आसीत् सः सर्वेषां प्रातिवासिनां सहयोगं प्रायः करोति स्म। अन्या च तस्य रामलालस्य 'सुशीला' नाम्नि शिक्षिता पत्नी यथानाम तथा गुणवती, अतीव शीलवती संस्कारवती परिश्रमशीला चाऽऽसीत्। एकश्च पंचवर्षीयः संस्कारवान् पुत्रः, तस्य नाम आसीत् देवीलालः।

रामलालेन सुशीलया सह अन्तर्जातीयो विवाहः कृत आसीत्। अनेनैव एतयोः स्व-स्व परिवारेण सह नैव तारतम्य आसीत्, किन्तु परस्परमेतौ द्वावेवातीव प्रेमपूर्वकं न्यवसताम्। सहैव च जीवनमरणस्य शपथं कृतवन्तौ अनेकशः।

रामलालस्य पत्नी प्रातःकाले ब्राह्ममुहूर्ते उत्थाय प्रतिदिनं स्नानादिकं च कृत्वा प्रथमं पूजादिकं भगवत्स्मरणं च करोति स्म। तदनन्तरं च भोजनादिकं सज्जीकरोति स्म। एकदा प्रातःकाले एतौ चायपानं कुर्वन्तौ आस्ताम्।

तदैव रामलालः उवाच-भगवति! अस्माकम् एकः खलु पुत्रोऽस्ति एनं किं निर्मातुं वांछामः वयम्?

सुशीला अवदत्- अहं तु वांछामि यदेषः समाजसेवी चिकित्सको भवेत्।

रामलालः- नैव सुशीला, मम महतीच्छाऽऽसीत्, यदहं आई.ए.एस. भूयात्, किन्तु परिस्थितयः नैव एतादृश्य आसन्। भाग्योऽपि बहु प्रतिकूलताम् अगच्छत्, अनेनैव बैंकमध्ये लिपिको भूत्वा स्थितोऽस्मि सम्प्रति, अनेन मम तु बलवती इच्छा वर्तते यत्, एष अस्माकं पुत्रः खलु 'आई.ए.एस.' भवेत्।

सुशीला - यदि एवमस्ति, तर्हि भवान् समीचीनमेव वदति, अस्माकं पूर्णप्रयासः भविष्यति स्वजीवने, यत् पुत्रोऽस्माकम् अयम् आई.ए.एस. भूयात्, अस्माकं च नामोच्चं कुर्यात्। इति।

अद्य रामलालोऽतीव प्रसन्नोऽस्ति, यतोहि अस्मिन् दिने तस्य पदोन्नत्याः घोषणा भविष्यति बैंकमध्ये। अतएव सः विशेषेण सज्जो भूत्वा स्व बैंकं प्रति गच्छति स्म। मार्गे च तस्य समक्षं पूर्वाण्यनेकानि चित्राणि आगतानि-गतानि च। एकवर्षपूर्वं खल्वनेन एषा 'नौकरी' कृताऽऽसीत्। तस्य चिन्तनम् एतत् परिचलति एव......।

तदैव तस्य पुरः एकेन तीव्रगत्याऽऽगतेन भारवाहनेन ट्रकेन तस्य रामलालस्य द्विचक्रिका संघट्टिता। अनेन तस्य द्विचक्रिका तु विखण्डिता अनेकभागेषु, रामलालस्य च उच्चस्वरेण हृदयद्राविकी ''चीख'' निस्सरिता तथा सः भूमौ पतित्वा किंचित्कालपर्यन्तं स्फुरितवान्, अनन्तरं च दर्शयन्-दर्शयन् निश्चलः संजातः। तदैव खल्वनेके जनाः एकत्रिताः संभूताः तत्र। ते परस्परमेवं वार्तालापं कुर्वन्ति स्म।

एकः जनः- अहो, कीदृशी हृदयद्राविकी दुर्घटना संजाता प्रातःकाले खलु? वराकः, मार्गे सम्यक् एव परिचलति स्म, किन्तु अनेन ट्रकचालकेन प्रतीयते मदिरा गृहीताऽऽसीत्, अनेनैव अनुचितं मार्गे आगत्य एष दुर्भागः संघट्टितः, अधुना त्वस्य मृत्युः संजातः, नैवावसरो दत्तोऽनेन यत् चिकित्सालय-मपि नयेम। ट्रकचालकस्तु पलायित एव।

अन्यः जनः- भ्रातः! एषा तु महत् दुःखान्तिका संजाता। अधुना तु पुलिसं प्रति सूचना देया, येन पोस्टमार्टमादिकं भवेत्, अनन्तरं ज्ञास्यामः कोऽयमस्ति? येनास्य अन्तिमस्य संस्कारस्य व्यवस्थां करिष्यामः, अस्य सम्बन्धिनः के सन्ति अस्मिन् नगरे? तान् प्रत्यपि सूचना देया अस्माभिरेव।

तदैव तस्य रामलालस्य पत्नी या सब्जी-क्रयणार्थं निस्सरिता गृहात्, तत्र सम्मर्दं दृष्ट्वा मनसि चिन्तितवती, नैव जाने किं संजातं प्रातःकाले खल्वत्र।

किन्तु यदा सा सम्मर्दे जनान् इतस्ततः किंचित्प्रयत्न-पूर्वकं कृत्वा प्रविष्टा, तदा सा भूमौ स्वपतिं रामलालं रक्तरंजितं पतितं दृष्टवती। अनेन तस्यास्तु 'भूः खलु निस्सरिता पादाभ्याम्'। क्षणं यावत्तु सा जडवत् संजाता, अनन्तरं एतत् कथं संजातम्? इत्युक्त्वा सा तं शरीरम् आलिंग्य अनेकशः, स्वांके च तस्य रक्तरंजितं शिरः निधाय कारुणिकं रोदनं तारस्वेरण कृतवती। तत्रस्थाः सर्वे जनाः अतीवकारुणिकाः संजाताः, रोदनेन तेषां सर्वेषां नेत्रेषु अश्रूणि आगतानि। तेषु काश्चित् स्त्रियः अग्रेसराः भूत्वा तां सुशीलां सान्त्वनावचांसि उक्तवत्यः।

तदैव पुलिसकर्मिणोऽपि अनेके आगतवन्तः तत्र। ''इनक्वारी'' च बहुशः अकुर्वन्। पंचनाम च कृत्वा तस्य च

रामलालस्य मृतशरीरं गृहीत्वा चिकित्सालयं नीतवन्तः 'एम्बुलेंस' नाम वाहनेन तस्य 'पोस्टमार्टम'-कृते। सुशीला अपि तेन सह ''एम्बुलेंस'' मध्ये आरोहिता।

रामलालस्य सम्बन्धिनः तस्या सुशीलायाश्च गृहात् माता-पिता आगतवन्तः। रामलालस्य अन्तिमः संस्कारः तस्मिन्नेव दिने सायंकालं यावत् कृतः। अनन्तरं सर्वे सम्बन्धिनः सुशीलाम् अवदन्-

पुत्रि! अधुना त्वं अस्माभिः सह चल। तत्रैव एषः देवीलालोऽपि अध्ययनकार्यं करिष्यति। नैव इदानीं तव अत्र निवसनम् उचितम् अस्ति, यतोहि त्वम् अत्र एकाकिनी। नार्यः एकाकिन्यो नैव सुरक्षिताः भवन्ति। अत्र एकोऽपि नास्ति?

तेषां च सर्वेषां तद् वचनं श्रुत्वा सुशीला, तैः पूर्वकृतानि कृत्यानि स्मरन्, कठोरतमं दुर्व्यवहारं च विचिन्त्य (धैर्यपूर्वकम् स्व-अश्रूणि अवरुध्य) दृढस्वरेण अवोचत्-

अम्ब! नैवाहं अस्मात् स्थानात् कुत्रापि गमिष्यामि। मम एक एव पुत्रोऽस्ति, एषः रामलालस्य 'निशानी' वर्तते। अहं परिश्रमं कृत्वा स्वयमेव एनं स्वपुत्रं पाठयिष्यामि। अस्य निर्माणं खलु मम जीवनस्य लक्ष्यम् इदानीम्। अतएव मया भवद्भ्यः सर्वेभ्यः प्रार्थना एषा क्रियते अत्यन्त विनम्रभावेन यत्-

''भवन्तः स्व-स्व गृहेषु गच्छन्तु इदानीम्, (किंचिद् विरम्य) अस्यां दुःखस्य वेलायां भवन्तः आगतवन्तः, एतदर्थम् अहम् अतीव कृतज्ञाऽस्मि भवतः सर्वान् प्रति। केवलं वांछेऽहं यत्भवन्तः अस्य मम पुत्रस्य उपरि स्व-स्व-आशीर्वचांसि वितरन्तु। एषः स्वपितुः स्वप्नान् साकारान् कुर्यात्।''

तस्याः तं रूक्षं व्यवहारं दृष्ट्वा सर्वे सम्बन्धिनः स्व-स्व गृहं गतवन्तः। यतोहि पूर्वकाले तेऽपि अतीव-कठोर-व्यवहारं कृतवन्तः ताभ्याम् सह। वस्तुतः अन्तर्जातीयविवाहं कृतवन्तौ एतौ परस्परम्। अनेन वै कारणेन सर्वे सम्बन्धिनः अतीवाक्रोशिताः आसन्। तैस्तु विवाहकाले खलु कथितम्- ''यत् एतं विवाहं कृत्वा तु अस्माकं कृते युवाम् द्वौ मृतवन्तौ खलु।''

रामलालस्य पुत्रस्य जन्मकालेऽपि नैव कोऽपि सम्बन्धी आगतवान्। अनेन अतीव कटुता आसीत् परस्परं तेषां मध्ये।

तस्मादेव दिवसात् सुशीलायाः जीवनस्य एकमेव लक्ष्यं संजातम्। यत् अस्माकं पुत्रः देवीलालः आई. ए. एस. वै भवेत्। एतदर्थं तया अनेकप्रकारेण दिवा-रात्रौ परिश्रमं कृत्वा तस्मै उच्चशिक्षा प्रदत्ता। बैंकमध्ये तस्यै 'नौकरी' अपि न मिलिता, यतोहि तत्र रामलालस्य खलु एकवर्षः एव अभवत्, नैव तत्र सः स्थायी आसीत्। एतदर्थं सा जनानां गृहेषु कार्यं कृत्वा रात्रौ च वस्त्रसीवनं कृत्वा किंचित्धनं अर्जितवती, तेन खलु धनेन सा स्वपरिवारस्य पालन-पोषणं करोति स्म तथा च स्व पुत्रस्य शिक्षार्थमपि धनं एकत्रितं करोति स्म।

अद्य सुशीला अतीव प्रसन्ना अस्ति। यतोहि तस्याः पत्युश्च स्वप्नः साकारतां प्राप्तः। अद्य खलु तस्याः 'संघर्षः' अपि सफलोऽभवत्, यतोहि सम्प्रति तस्याः पुत्रः देवीलालः आई.ए.एस. संजातः। अस्मिन्नेव नगरे जिला कलेक्टररूपेण तस्य नियुक्तिः संभूता। अनेनैव नगरनिवासिभिः अद्य अभिनन्दन-समारोहः आयोजितः तस्य पुत्रस्य नगरस्य विशाले सभागारे।

समारोहे साऽपि आमन्त्रिता नगरवासिभिः। प्रातः उत्थाय सुशीला सर्वप्रथमं मन्दिरं गतवती, धन्यवादान् च बहुशः अर्पितवती भगवन्तं प्रति, यत् तेनैव भगवता तस्याः जीवनस्य 'संघर्षः' सफलः कारितः। मन्दिराद् आगत्य यदा सा समारोहस्थलं कारयाने स्थित्वा स्वपुत्रेण सह गच्छति स्म। तदापि तस्याः प्रसन्नतायाः नैव पारावारः आसीत्। तस्याः नेत्रयोः अकस्मादेव अश्रूणि आगतानि, सर्वं विचिन्त्य पूर्वा घटनाक्रमम्। सहैव तस्याः स्व पत्युः रामलालस्य स्मृतिरपि आगताऽऽसीत्।

तदैव समीपस्थेन देवीलालेन तस्याः अश्रूणि प्रोंछितानि स्व कर-वस्त्रेण खलु उक्तवान् च विनम्रभावेन सः-

''अम्ब!'' अधुना तव सर्वाणि कष्टानि दूरीभूतानि, अहं तव सर्वाः इच्छाः पूरयिष्यामि। माम् ''आई.ए.एस.'' निर्माणार्थं बहूनि कष्टानि भवत्या अनुभूतानि। अधुना तेषां सर्वेषां अन्तः संजातः। अद्य समारोहे नैव मम अभिनन्दनं भविष्यति तवैव खलु अस्ति, यतोहि भवादृशी माता यदि सर्वेषां भवेत्, तर्हि अवश्यमेव अस्माकं देशे सर्वे युवानः सम्मानजनकं पदं लभेरन्।''

तस्य तद्वचनं श्रुत्वा सुशीला भावुका संजाता तथा च सा पुत्रम् तं स्व क्रोडे कृतवती कारयाने खलु। इति।

**सेवा निवृत अध्यक्ष, संस्कृत-विभाग**
**श्री गोविन्द गुरु राजकीय महाविद्यालय, बांसवाड़ा**

# ।। प्रियं भारतम् ।।

❑ रमेशचन्द्र शर्मा, प्राध्यापक

प्रियं भारतं वीरभूमिं नमामः।
नमामो वयं राष्ट्रभक्तान्नमामः।।
सदा पूजनीया पवित्रा च गंगा।
विशालं च रूपं महासागरस्य।। 1।।

प्रियं भारतं पावनं विश्ववन्द्यम्।
पठन्ति प्रजाः देववाणीं सदात्र।।
सदा ज्ञानविज्ञानदेशे जनानाम्।
विकासः प्रकाशः सदा हि प्रभाति।। 2।।

जनाः यत्र प्राणान् त्यजन्ति सहर्षम्।
स्वदेशाय चैवाभिमानाय तत्र।।
यदा सैनिकाः रक्षणार्थं सुसज्जाः।
तदा शत्रुदेशाः विभीताः भवन्ति।। 3।।

सदा रक्षणार्थं च प्राणान् त्यजन्ति।
कुलं बान्धवान् सर्वसौख्यं त्यजन्ति।।
मदीयः च देशः सदा रक्षितः स्यात्।
सदा सैनिकान् देशभक्तान् नमामः।। 4।।

विचारेषु कार्येषु देशाः विदेशाः।
महत्वं महाभारतस्य ब्रुवन्ति।।
पुराणेषु काव्येषु योगेषु तत्वम्।
सदा वन्दनीयं स्वदेशे विदेशे।। 5।।

नदीनां प्रवाहः वनानां च शोभा।
द्रुमाणां हि छाया च केकीकलापम्।।
अलीनां च लीला मयूरस्य रंगम्।
हरन्त्येव चित्तं प्रभाते जनानाम्।। 6।।

अनेकेषु ऐक्यं विभिन्नेषु साम्यम्।
सदा सत्यवाणी अधर्मस्य त्यागः।।
सुधीनां गुरूणां च देवस्य पूजा।
प्रिये भारते सर्वमेवं विभाति।। 7।।

सदा सर्वशिक्षा सदा स्वच्छता च।
पुनीते हि देशे च नार्यस्तु पूज्याः।।
मृगः स्वर्णिमः व्योमगंगा विभाति।
विभात्यत्र रामस्य गाथा पुनीता।। 8।।

प्रियं भारतं वीरराष्ट्रं नमामः।
सदा सैनिकान् देश भक्तान्नमामः।।
नमामः कवीन् राष्ट्रपुरुषान् नमामः।
नमामो वयं सर्व देवान् नमामः।। 9।।

सदा पर्वताः सागराः यत्र पूज्याः।
कवीनां च वीराङ्गनानां च देशः।।
नदीनां द्रुमाणां च देशः मदीयः।
नमामो वयं भारतं सर्वदैव।। 10।।

प्रिये भारते वीरराणाप्रतापः।
प्रियः अर्जुनश्च यशोदा च माता।।
मदीयश्च रामः सदा वन्दनीयः।
नमामो वयं कृष्णचन्द्रं सदैव।। 11।।

कलाः संस्कृतिः यत्र भिन्नाश्च सन्ति।
जनानां विचित्रा च या वेशभूषा।।
प्रदेशे प्रदेशे विभिन्ना च भाषा।
तदाप्येकता जायते यत्र देशे।। 12।।

मदीये च देशे अनेके च वीराः।
सुभट्टाः सुहट्टाः सदा दानवीराः।।
सुभामाः सुदामापि देशे मदीये।
मदीयश्च देशः सदा वन्दनीयः।। 13।।

वयं द्वारपालाः वयं भूमिपुत्राः।
वयं सैनिकाश्च वयं भारतीयाः।।
वयं वीरपुत्राश्च माता च भूमिः।
वयं रक्षकाः भारतस्य नरेन्द्राः।। 14।।

प्रिये भारते सर्वमेवं नवीनम्।
नवीना च गाथा नवीनं हि ज्ञानम्।।
नवीना हि विज्ञान-बुद्धिः जनानाम्।
नमामो वयं भारतं देवरूपम्।। 15।।

झोटवाड़ा, जयपुर

# वास्तुशास्त्रस्य परिचयः

❑ मुकेश कौशिक

अस्य जगतः सर्वे प्राणिनः एतादृशं स्थानम् इच्छन्ति यत्र ते स्व सम्पूर्ण-जीवनं सुखेन सुरक्षितरूपेण च जीवितुं समर्थाः भवेयुः। निवास एतादृशो भवेत् यत्र कस्यापि प्रकारस्य भयं न भवेत्। प्रत्येकं प्रकारस्य वातावरणस्य कस्यापि प्रकारस्य परिस्थितौ तं तस्य परिवारं च किमपि कष्टं न बाधेत्। अतः प्रत्येकं जीवस्य कृते स्वपरिवारस्य च कृते उचित-निवास-स्थानस्य अथवा भवन-निर्माणस्य क्षमता प्रकृत्या जैविक-प्रवृत्तिरूपेण प्रदत्ता। प्रत्येकं प्राणी कामं सूक्ष्मं स्थूलं वा सः स्वावश्यकतानुसारं योग्यतानुसारं च निवासाय गृहं निर्माति।

प्रत्येकं जीवस्य जीवने स्वयोग्यस्य गृहनिर्माणस्य प्रवृत्तिः योग्यता च एकवंशतः अन्यवंशं वंशानुगत-रूपेण प्राप्ता भवति। कस्यापि प्राणि-विशेषस्य गृह-निर्माणस्य विधिः समयानुसारं न परिवर्तितः। अद्यापि दृश्यते यत् पक्षिणः तादृश एव नीडं निर्मान्ति यादृशं पूर्वसमये निर्मीयते स्म। इदं प्राकृतिकमेवाश्चर्यं यत् प्राणी स्वनिवासम् एवं निर्माति येन सः स्वस्य स्वपरिवारस्य च स्वारिभ्यः प्राकृतिकापदभ्यश्च सुरक्षां कर्तुं शक्नुयात्। स्वावश्यकता नां कर्तुं समर्थो भवेत् प्रकाश-वर्षा-वायु-तापादीनां प्राकृतिक-स्रोतसामावश्यकतानुसारंमुपयोगं कर्तुं प्रभवो भवेत्।

प्राणिषु सर्वोत्तमप्राणी मनुष्यः। तस्मै विकसित-मस्तिष्कः ईश्वरप्रदत्तोऽस्ति। अनेन सः स्वविवेकेन विचार्य कार्यं करोति। निवासाय मानवस्य मूल-आवश्यकता भवनमस्ति। मनुष्यस्येदं कर्त्तव्यमस्ति यत् सः स्वपरिवारस्य कृते स्वसम्बन्धितप्राणिनां कृते निवासाय सुरक्षादृष्ट्या च भवनस्य निर्माणं कुर्यात्। सार्वजनिकोपयोगाय सामान्य-जनानाञ्च कल्याणाय कूप-वापि-मन्दिरादीनां निर्माणेन पुण्यस्य प्राप्तिर्भवति।

प्राचीन-भवनस्य, देवालयस्य, कूपस्य, वाप्यादीनां जीर्णोद्धारेण जनः सामान्यात् अष्टगुणाधिकं पुण्यं प्राप्नोतीति शास्त्रोक्तमस्ति। अन्यजनस्य भूमौ भवने वा शुल्कं विना यज्ञस्य, अनुष्ठानस्य, शुभकर्मकरणस्य च निषेधः वर्तते। यतो हि एतेषां सर्वेषां कर्मणां शुभफलं भवन-स्वामिना प्राप्यते। अयं ब्रह्माण्डः पञ्चाधारभूत-पदार्थेभ्यः निर्मितः। एते पदार्थाः पञ्चमहाभूतानि कथ्यन्ते। एतेषां पदार्थानां प्रभावम् अवगम्य तदनुसारं स्वभवनस्य आकार-प्रकार आदिकं निर्माय मनुष्यः स्वजीवनं कार्यक्षेत्रञ्च अधिकाधिकं सुखी सुविधासम्पन्नं कर्तुं शक्नोति।

दिगनुसारं भवन-निर्माणं कृत्वा तस्मिन् यः निवसति तस्मिन् जने ''वास्तु'' इत्यस्य स्पष्टरूपेण प्रभावः भवति। प्राचीनकालादेव अस्माकं ऋषयः एतेषां प्रभावाणाम् अध्ययनं कृतवन्तः। स्वानुभवान् च अस्माकं कृते अग्रे सारितवन्तः। शास्त्रेषु च लिखितवन्तः। इदमेव ज्ञानं वास्तुशास्त्रमिति उच्यते।

कस्यापि भवने निवासकरणेन स्वास्थ्यस्य सम्पदश्च वृद्धिः, ज्ञानप्राप्तिः, सन्तानसुखस्य च प्राप्तिर्भवति। जीवने शान्तिर्भवति, व्यक्तिः सर्वऋणेभ्यः मुक्तो भवति। शास्त्राणां सम्मतेः उपेक्षया अपयशसः, अनावश्यक-यात्राणां स्थितिः, अनेकदुःखानाञ्चोपस्थितिः भविष्यति। सर्वेषां भवनानां निर्माणं वास्तुशास्त्रानुगुणं भवेत्, ग्रामाणां नगराणाञ्च योजना तदनुसारमेव भवेत्। अतएव समस्तलोकस्य कल्याणाय तथा च सुख-समृद्धेः कामनया वास्तुशास्त्रं प्रस्तुतमस्ति।

वास्तुशास्त्रमेकं प्राचीन-विज्ञानम् अस्माकं सांस्कृतिक-धरोहरस्य महत्त्वपूर्णोंशोऽस्ति। शास्त्रेऽ-स्मिन् निवासस्य, कार्याणाञ्च कृते भवननिर्माण-

सम्बन्धि-सिद्धान्तानां विधीनाञ्चोल्लेखः वर्तते। वास्तु केवलं भवन-निर्माणकलायाः अथवा अध्यवसायस्यैव नाम नास्ति अपितु अस्मिन् एतादृशाः सिद्धान्ताः निर्देशाश्च निहिताः सन्ति यैः ज्ञायते यत् भवनस्य निर्माणाय भूमेः चयनं कस्मिन् स्थाने, कस्मिन् आकारे, कस्यां च दिशि कर्त्तव्यम्, मृत्तिका-परीक्षणं कथं कर्त्तव्यम्। शिलान्यासः कथं कर्त्तव्यः, भवन-निर्माणं कथं कर्त्तव्यम् इत्यादयः। वास्तुशास्त्रं वैज्ञानिक-रूपेण अस्मान् शिक्षयति यत् अस्माभिः भवनस्य नियोजनं, निर्माणञ्च एवं कर्त्तव्यम्। येन अस्माकं जीवनं सुख-समृद्धियुक्तं भवेत् तथा च व्यवसाये निर्बाधगत्या लाभं प्राप्य वयम् उन्नतिं प्राप्नुयाम।

वास्तुशास्त्रस्योद्गमः स्थापत्यवेदात् अभवत्। अयम् अथर्ववेदस्यैव एकः अंशः वर्तते। अस्मिन् विषये अन्यानि प्राचीन-शास्त्राण्यपि सन्ति-विश्वकर्मा-प्रकाशः, समरांगणसूत्रधारः, कश्यपशिल्पशास्त्रम्, बृहत्संहिता, प्रमाणमञ्जरी, मयमत इत्यादयः। विद्वांसः एतत् शास्त्रीयज्ञानम् अग्रिमवंशं प्रति हस्तांतरणस्य प्रयासं कृतवन्तः।

सूर्य-चन्द्रयोः अन्यग्रहाणाञ्च पृथिव्याः वातावरणे कः प्रभावः पतति, पर्याप्ताध्ययनेनैव अनुभवाधारेणैव प्राचीन-ग्रन्थाः लिखिताः वर्तन्ते। अस्य ब्रह्माण्डस्यात्मा सूर्यः स्वीकृतः। अयमेवा ऊर्जायाः प्रमुख-स्रोतः वर्तते। सूर्येण अन्यतारकैश्च प्राप्तोष्मायाः, प्रकाशस्य, सर्वेषामाकाशीयपिण्डानां परस्पर-आकर्षणशक्तेः, पृथिव्यामुत्पन्नचुम्बकीयबल-क्षेत्रस्य, तथा च अन्य-भौतिककारकाणां प्रभावः पृथिव्याः वातावरणे निश्चितरूपेण पतति। मानव-जीवने अस्यानुकूलः प्रतिकूलः वा प्रभावः पतति। अतः ज्योतिषखगोलयोः वास्तुशास्त्रेण निकटसम्बन्धः वर्तते।

ज्योतिष-खगोलसम्बन्धिकारकाणि व्यक्तेः जीवनं अत्यधिकं प्रभावयन्ति। अतएव वास्तुशास्त्रस्य नियमाः सिद्धान्ताश्च ज्योतिषशास्त्राधारिताः सन्ति। कस्यापि प्रकारस्य निर्माणसमये एतेषां सिद्धान्तानां सम्यक्तया विचारः करणीयः। विश्वकर्मानुसारं वास्तुशास्त्रस्य कारणादेव समस्त-ब्रह्माण्डः सुखं, समृद्धिं वैभवञ्च प्राप्नोति। मनुष्यः देवत्त्वं प्राप्नोति। शिल्पशास्त्रस्य ज्ञाने संसारस्य अस्तित्वे च सहसम्बन्धो वर्तते। यः वास्तुशास्त्रस्य अनुपालनां करोति सः न केवलं सांसारिकसुखान् प्राप्नोति अपितु नैसर्गिकसुखशान्तिमपि प्राप्नोति।

**शोधार्थी-**
**30, जीवन विहार**
**निशि विद्या मन्दिर स्कूल के पास**
**हीरापुरा, जयपुर-302021**

## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम – भारती**
**खाता संख्या – 2139101912502**
**IFS Code - CNRB0002139**

# श्रीअजमल-भक्ति-गाथा ( काव्यम् )

( गताङ्कादग्रे )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

दुर्गे ते चोण्डुकाश्मीरे तेजोदीप्तिश्च प्राङ्गणे।
मिष्टं दुग्धं पयः सर्वं कुङ्कुमेन पदाङ्कनम्।। 89।।

मन्दिरे घण्टिकानादः स्वतः शंखध्वनिस्तथा।
जन्मकाले भविष्यन्ति मङ्गलानि शुभानि मे।। 90।।

श्रीद्वारकाधीशवचो निशम्य
नृपः प्रसन्नो वरमाप्य काम्यम्।
मुहूर्मुहुस्तच्चरणौ प्रणम्य भक्त्या
कृतार्थो निजगाद नम्रः।। 91।।

## राजोवाच

भूपतिः सेवकं स्मृत्वा तस्याभीष्टमुवाच ह।
हेनाथ! भवतां भक्तः सामरः सेवकः प्रियः।
गोभक्तः प्रार्थयामास गृहस्थे सन्ततेः सुखम्।। 92।।

## श्रीभगवानुवाच

पुत्रमेकं सुताञ्चैकां प्राप्स्यति भक्तसामरः।
गृहस्थः सरसस्तस्य लोके भक्त्या भविष्यति।। 93।।

प्रयाहि राजन्! भुवि शोकमग्नः
प्रजाजनास्ते परिवारलोकाः।
त्वद्दर्शनायैव भजन्ति भक्त्या
स्मरन्ति मां त्वानशनं विधाय।। 94।।

कृष्णचन्द्रमुखाम्भोजं सुस्मितं चारुलोचनम्।
विलोक्य भावसम्प्रीतो गन्तुकामो जगौ जयम्।। 95।।

जयतु जयतु स्वामिन्! द्वारकानाथ! विष्णो!
वसतु वसतु नित्यं मे हृदब्जे दयालो।
तव गुणगणकीर्त्या नामसंकीर्तनैश्च
भवतु भवतु धन्यं जीवनं मे सुभक्त्या।। 96।।

प्रभुं श्रीद्वारकानाथं प्रणम्याजमलो नृपः।
भावुको भगवद्भक्तः प्रतस्थे मुदिताननः।। 97।।

राज्ञी प्रिया ग्रामजनाश्च भक्ता
भूपं विना दुःखसमुद्रमग्नाः।
विलोक्य भूपं सहसा समुद्राद्विनिः
सृतं ते मुदिता बभूवुः।। 98।।

## राजोवाच

शोकं चिन्ताञ्च दुःखञ्च त्यजन्तु मे प्रिया जनाः।
आयातोऽहं वरं प्राप्य कृतार्थः कृष्णदर्शनात्।। 99।।

प्रजाजना ग्रामजनाश्च भक्ताः
समागतास्तीर्थनिषेवणार्थम्।
सद्यः समुत्थाय ययुः प्रसन्नाः
राज्ञी-समेताश्च नृपान्तिकं ते।। 100।।

श्री द्वारकानाथ दयार्द्रदृष्ट्या
मनोरथो मे सफलः सुताप्तेः।
समागतः प्राप्तवरोऽहमद्य
विधेहि राज्ञि! त्विह दानपुण्यम्।। 101।।

तुलादानं ददौ तत्र सभार्यो भूपतिर्मुदा।
आयातश्चोण्डुकाश्मीरं धर्मात्मा हृष्टमानसः।। 102।।

पुत्रप्राप्तिवरं श्रुत्वा कृतज्ञैर्मुदिताननैः।
ब्राह्मणैः कुलवृद्धैश्च भक्तैर्भूमिजनैस्तदा।। 103।।

राजवंशाभिवृद्ध्यर्थं कृतो होमः सदक्षिणः।
भोजनैर्दानमानैश्च राज्ञा लोकाः समादृताः।। 104।।

गोभक्तो भजनानन्दी द्वारकानाथमाश्रितः।
नित्यं भोजनवस्त्राद्यैः सन्तसेवाव्रतं दधौ।। 105।।

हे कृष्ण! द्वारकानाथ ! वासुदेव ! जगत्पते।
गोविन्द ! सच्चिदानन्द! त्राहि मां शरणागतम्।। 106।।

राजा मन्त्रं जपन्भक्त्या नित्यपूजापरायणः।
सद्गृहस्थोऽप्यनासक्तः सभार्यो धर्ममास्थितः।। 107।।

वर्णजात्युच्चनीचादिभेदभावविवर्जितः।
सत्संगसभाः कृत्वा ग्रामे ग्रामे गृहे गृहे।। 108।।

लोकसंगठनेनैव सन्तभक्तसुसेवया।
धर्मरक्षां नृपश्चक्रे सत्संगैः कृष्णकीर्तनैः।। 109।।

धर्मान्धैर्यवनैः क्रूरैर्भीतां विद्रावितां प्रजाम्।
धर्मान्तरणसन्त्रस्तां भक्त्या शक्त्या ररक्ष ह।। 110।।

कृष्णे रतिर्गतिः कृष्णे स्मृतिः कृष्णे मतिस्तथा।
वर्द्धतेऽहर्निशं राज्ञः पुत्र-दर्शनलालसा।। 111।

शास्त्रखवेदसब्रह्म विक्रमाब्दे शुभे गृहे।( वि.सं. 1406 )
माघे वसन्तपञ्चम्यां देवो जातोहि वीरमः।। 112।।

पुत्र-जन्मोत्सवं द्रष्टुं लोकाः राजगृहं गताः।
द्विजेभ्यश्च ददौ दानं दीनेभ्यो भूपतिर्मुदा।। 113।।

धर्मज्ञो विजयी वीरो बालोऽयं कुलदीपकः।
जन्मलग्नफलञ्चैतद् दैवज्ञैः समुदीरितम्।। 114।।

ग्रहखवेदसब्रह्म विक्रमाब्दे समागते।( वि.सं. 1409 )
भाद्रस्य शुक्लपञ्चम्यां निशायां मन्दवासरे।। 115।।

तेजोदीप्तमयं दुर्गं राज्याः कक्षं प्रभामयम्।
घण्टाशंखध्वनिश्चैव दुग्धं भवनवारिचः।। 116।।

राज्याः पर्यङ्कपर्यन्तं प्रवेशद्वारतस्ततः।
मुकुन्दपदचिह्नानि मङ्गलानि शुभानि च।। 117।।

विलोक्य मुदितो राजा सस्मार भगवद्वचः।
प्रभुः श्रीद्वारकानाथः सर्वमङ्गलदायकः।। 118।।

पुत्रो भूत्वा गृहे मेऽद्य प्रादुर्भूतो वरप्रदः।
पुत्रजन्मसमारम्भां गिरां वर्धापनान्विताम्।। 119।।

श्रुत्वा प्रीतो ददौ दानं स्वस्तिवाचनपूर्वकम्।
बालवृद्धनराः नार्यो याताः राजगृहाङ्गणे।। 120।।

पुत्रजन्मोत्सवं द्रष्टुं व्रजे नन्दोत्सवं यथा।
जन्मलग्नफलादेशं श्रोतुं राजा सुतस्य ह।। 121।।

विप्राञ्ज्योतिर्विदो विज्ञान् वेदज्ञांश्च समाह्वयत्।
जन्मलग्नफलं विप्रैर्यदुक्तं तद्विलिख्यते।। 122।।

सुतस्ते रामदेवोऽयं द्वारकेशः कलाधरः।
समर्थः शक्तिसम्पन्नो दयालुः कुलदीपकः।। 123।।

साधूनां गोद्विजानाञ्च रक्षकः खलनिग्रहः।
स्वधर्मरक्षको धीरो रक्षोवंशविनाशकः।। 124।।

दीनानां दलितानाञ्च पीडितानां भयापहः।
तेजस्वी सत्त्वसम्पन्नो लोकपूज्यो भविष्यति।। 125।।

जन्माङ्गचक्रग्रहयोगलग्नफलानि
पुण्यानि शुभानि यानि।
राजा सभार्यो मुदितो निशम्य
गोभूहिरण्यानि ददौ द्विजेभ्यः।। 126।।

राजा धन्यः प्रजा धन्या राज्ञी धन्या पतिव्रता।
पुण्या मरुधरा धन्या रामदेवस्य जन्मना।। 127।।

साकारा सगुणा भक्तिर्द्वारकानाथ-विग्रहे।
भुक्तिमुक्तिप्रदा पुण्या ह्याविर्भूता नृपाङ्गणे।। 128।।

दोलने पालने चैव दुग्धपाने च क्रीडने।
विलोक्य बाललीलास्ताः मुदितौ राज-दम्पती।। 129।।

एकदा मातरं प्राह कुमारः सुस्मिताननाम्।
शीघ्रमानीय मे देहि सुन्दरं वस्त्रघोटकम्।
नो चेद् दुग्धं न पास्यामीत्युक्त्वा रुष्टो हि रामसा।। 130।।

बाललीलां दृढं दृष्ट्वा मैणादे पुत्रवत्सला।
वस्त्राश्वमेकमानीय ददौ वायकनिर्मितम्।। 131।।

तस्मिंश्च प्राणसञ्चारं चकार, रामसा ''प्रभुः''।
दर्शनाद् घोटकस्तत्र ननाद हिनहिनेति च।। 132।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

## निवेदन

भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291/8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।

नाम.............................................................पुत्र/पुत्री श्री.............................भवन संख्या...........

गली/ मोहल्ला/कॉलोनी.........................................वाया/पोस्ट ऑफिस....................................

तहसील.................................जिला.................................राज्य.....................................

देश...................पिन.........................................................दूरभाष..................................

मोबाईल नं...........................ईमेल..................................................................

निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक
भारती संस्कृत मास पत्रिका
बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014
ई–मेल – sanskritbharti09@gmail.com

# चण्डवैशाखवाताः

❑ मिश्रोऽभिराजराजेन्द्रः
राष्ट्रपतिसम्मानितः

ग्रीष्मज्वालाग्निमालाक्कथितरविघटप्रान्तनिर्यज्जलानां
सन्तप्तैश्शीकरौघैः सहवसतिवशाद्
ये प्रदग्धं समर्थाः।
वीथ्यां वीथ्यामटन्तो नृपतिजनपदे दारुणातङ्कशीला
वान्त्याग्नेयाः प्रमत्ता इव
दहनजुषश्चण्डवैशाखवाताः।।1।।
जीर्णे शीर्णे कुटीरे दिशि दिशि निविडैङ
कासकड्यापरीते कौपाम्भोभिर्निषिक्ते
हिमशिशिरमरुच्छीतलिम्नाऽभिभूते।
मध्याह्नेऽस्मिन्निदाघे स्वपिति सुखमहो निस्त्रपोऽयं
कुटुम्बः पत्नी-पुत्री-वधूटी-दयित-
गृहभुवाञ्चेतरेषां निकायः।।2।।
कोणे कस्मिंश्चिदेधः स्नुतमधुरपयः पाययन्ती
स्वशावान् विश्रान्तेयं विडाली निरतिशयसखं
विन्दते भाग्यसिद्धम्।
आम्रं त्रोटीपुटाग्रैः शकलयितुमहो सोद्यमः
पञ्जरस्थः कीरो मौनं श्रितोऽयं तपति हिमगिरौ
मुक्तिकाङ्क्षी यतीव।।3।।
कुट्यां ब्रह्माण्डमायां रविशशिगुरवस्सर्व
एव ग्रहौघा-स्तावच्छान्ता न यावद्
विकलयति जनान् कोऽपि डिम्भः प्रबुद्धः।
पृच्छन्तः किन्तु जातं निरतिशयघनस्वापमग्नाः
समेऽपि उन्निद्रा हन्त जाता अवसरविदुषी
द्राग्विडाल्यप्यदृष्टा।।4।।
वृक्षच्छायां श्रयन्ते वनचरपशवश्चापि गोष्ठीं विधाय
श्वानश्चोद्वृत्तजिह्वाः खरनखरचयैः शेरते दीर्णगर्ते।
सन्त्यस्तं पश्चिमायां दिशि
खरतरणिं तीव्रवेगाल्लुठन्तं।
दर्शं दर्शं विहङ्गा मधुरकलरवैरट्टहासं हरन्ते।।5।।
कस्माच्चण्डांशुमाली विगलितकरुणो
भाति लोकं दिधक्षु-र्धानाकल्पान्नु
जीवानवनितलकटाहेषु भूर्जत्यनल्पम्।
कस्माच्चायं क्षमो नो हिमगिरिपरिधौ
किन्तु कर्तुं न तादृक् मन्ये,
देवाधिदेवश्श्वसुरगृहमिति श्रद्धधानो बिभेति।।6।।
भृङ्गान् सम्मोद्य नूत्नैरमृतरसझरीमञ्जरीगन्धपूरै-
र्ध्वाङ्क्षान् छायावितानैः
परभृतनिवहं वृन्तलग्नैः फलौघैः।
कीरान् कीटान् कपीन्द्रान् गवयमृगगणान्
काम्यरम्योपहारै-र्माकन्दोऽयं निदाने
सदयगृहपतिः प्राघुणान् नन्दतीव।।7।।
श्रुत्वा चण्डांशुवृत्तं हरितवसुमतीदाहि जीवैरसह्यं
हाहाकारोऽवसन्नोऽमरपुरनगरीरक्षिताऽसौ महेन्द्रः।
तच्छौण्डीर्यं विभङ्क्तुं दिशति
जलधरान्पुष्करावर्तकाख्यान् नादो व्योमान्तराले
सपदि घनघटाझर्झरीणां समुत्थः।।8।।
वन्याः स्तम्बेरमाभा मृगपतिनिचयं भङ्क्तुकामाः
सरोषं धावन्तो वा लुलाया
ऋतुपतिविकसत्किंशुकोत्तप्तनेत्राः।
गण्डानां दृप्तयूथा अतिरभसभरैर्धावमानाः पयोदा
गर्जन्तो व्योम्निरूढाः पटुपटहरवैरागमं सूचयन्तः।।9।।
शिमला।

पुस्तकसमीक्षा

# काव्यसङ्कलनम्

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

पाश्चात्यभाषास्विव भारतीयभाषास्वपि काव्य-शिल्पे नूतनानां प्रयोगाणां समवतारणा दिनेष्वेषु प्रत्यक्षीक्रियते इति विदन्त्येव विपश्चितः। छन्दोमुक्ता नूतनकाव्यरचना आधुनिकपर्यावरणं प्रति जागरूकतायाः, नूतनप्रविधीनां समावेशस्य, विलक्षणानामपरिज्ञातानां चाभिव्यक्तीनां संप्रेषणस्य नूतनान् प्रयोगान् प्रदर्शयति कविताकौशले। बहुधा तादृशाः प्रयोगाः पोस्ट-मॉडर्न (उत्तर-आधुनिकता) शिल्प नाम्नाऽप्यभिधीयन्ते।

प्राचीनतमायां सत्यामपि नूतनतमायां संस्कृतभाषायां तादृशाः प्रयोगा अपि समवतार्यन्ते इति प्रमोदास्पदम्। तान्का-हाइकूप्रभृतिनामानि तु छन्दोविशेषानभिदधति किन्तु अभिव्यक्तिशैल्यामपि नूतनाः प्रयोगाः छन्दोमुक्तं नूतनं च शिल्पं यासु काव्यरचनासु परिलक्ष्यते तादृश्यो नवीनकाव्यरचना अपि प्रकाश्यन्ते इति सविस्मयं पश्येयुः पाठकाः। शान्तिनिकेतनस्थस्य कविवर्यस्य प्रो. अरुण-रञ्जनमिश्रस्य तादृश्येव नूतनप्रयोगधर्मिणी, उत्तराधुनिक-शिल्पवहा काव्यरचना सपद्येव प्रकाशमायाता यस्य शीर्षकमपि नूतनं प्रयोगं प्रतिनिदधाति। शीर्षकमस्या अस्ति ''तव जवाधरमन्मयरेखासु।''

काव्यसङ्कलनेऽस्मिन् छन्दोमुक्ताः नूतनप्रयोग-धर्मिण्यः 65 मुक्तककाव्यरचनाः प्रकाशिताः सन्ति यासु कविः कान्तां सम्बोध्य स्वानुभूतीः प्रकटयति। ''कालस्तवनयनवशः'' तवाऽऽगमनम् ''त्वन्मग्ने हृदयेऽद्य'' इत्येवंविधशीर्षकवहाः प्रयोगधर्मवत्यः काव्यरचना नूतनशिल्पं सुभृशं प्रस्तुवन्ति। ''दर्पणः भग्नो वा न जाने। जाने इदं यन्मम प्रतिबिम्बमिदानीं भग्नम्।'' इदमेकां काव्यरचनां प्रारभते, ''चल, तारकां नेतुं यावः, नीलाकाशस्य शीतलशाखाभ्यः।'' इदमपरां काव्यरचनां प्रारभते। एवं विधानां 65 काव्यरचनानामन्ते आङ्ग्ल-भाषायां डॉ. शशीभूषण मिश्राख्यस्य विदुष एकः समीक्षात्मकनिबन्धोऽप्यत्र मुद्रितो यस्मिन्नुत्तराधुनिक-काव्यशिल्पस्यावधारणां स्पष्टीकृत्य काव्यरचनानामासां विमर्शः प्रस्तुतोऽस्ति।

नूतनायाः प्रयोगधर्मिकाव्यशैल्याः प्रतिनिधि-भूतस्यास्य रचनासंग्रहस्य स्वागतं संस्कृतजगति विधास्यत इत्याशास्यते।

**तव जवाधरमन्मयरेखासु कविः प्रो. अरुणरञ्जन मिश्रः, प्रका. बनारस मर्केटाइल कम्पनी, 125, महात्मा गांधी मार्ग, कोलकाता पृ.सं. 152, मू. 300/-**

## रमाकान्तकाव्यसंग्रहः

राष्ट्रपतिसम्मानितस्य पद्मश्रीसम्मानेन सभाजितस्य ''अर्वाचीनसंस्कृतम्'' पत्रिका सम्पादकस्य सुप्रथितकवि-वर्यस्य डॉ. रमाकान्त शुक्लस्य नूतनं काव्यसङ्कलनं ''कान्तकाव्याञ्जलि'' नाम्ना प्रकाशित-मस्तीति विज्ञाय प्रमोदेरन् पाठकाः। कविप्रवरोऽयं विभिन्नासु शैलीषु विभिन्नान् विषयानादाय काव्यप्रणयने दक्ष इति विदन्त्येव विद्वांसः। संस्कृतच्छन्दःस्वप्ययं कवितालेखनं कुरुते, गीतेष्वपि। ''भाति मे भारतम्'' गीतिरस्य गतदशकेषु सुतरां ख्यातिं गतेति सर्वे जानन्ति। नवीनेऽस्मिन् काव्यसङ्कलने सर्वविधासु शैलीषु 72 काव्यरचनाः संगृहीताः सन्ति। ''भाति मे भारतम्'' गीतिर्भारतस्य गौरवं विवृणोति किन्तु तस्या एवापरः पक्ष एकस्यामन्यस्यां गीतरचनायां कविवर्येण विवृतो यो हि संग्रहेऽस्मिन् प्रकाशितायां ''रौति ते भारतम्'' शीर्षकवहायां रचनायां गतेषु दिवसेषु देशे भ्रष्टाचार-बलात्कारादिघटनाः सङ्केतयित्वा तासां निवारणस्यावश्यकतां सूचयति।

एतासु काव्यरचनासु देशदशा, नगरवर्णनानि, ऋतुचर्या, सेनाविक्रमवर्णनम् इत्यादयो विषयाः सन्दृब्धाः सन्ति, पर्यन्ते समस्या-पूर्तयोऽपि सन्ति। प्रारम्भे भारतीय-दूरदर्शनतः प्रसारितायाः ''भाति मे भारतम्'' शीर्षकवहाया गीतिशृंखलायाः विंशतिभागाः प्रकाशिताः सन्ति। समये समये प्रणीता अत्र मुद्रिता इमा रचनाः कदा व्यलेख्यन्त, कुत्र प्रस्तुताः प्रकाशिता वा इत्येतस्य सूचनाऽपि रचनानामन्तेऽङ्किताऽस्ति। एवंविधाः सूचना अपि सन्ति यत् 29/9/2016 दिनाङ्के रात्रौ भारतीयसेनया यदाकस्मिकाक्रमणं शल्यचिकित्सा (सर्जिकल स्ट्राइक) नामकं कृतं तेन प्रेरिता कविता ''शोभनं कृतम्'' शीर्षकवहा 8/10/2016 दिनाङ्के लिखिताऽभूत्। नूतनस्यास्य काव्यसंग्रहस्य स्वागतं संस्कृतजगति विहितमभूत्। एतस्योपलक्ष्ये वर्धापयामः कविवर्यं डॉ. रमाकान्त शुक्लम्।

**कान्तकाव्याञ्जलिः कविः डॉ. रमाकान्त शुक्लः प्रका. देववाणी परिषद्, आर. 6, वाणीविहार, नई दिल्ली 59, पृ. सं. 270, मू. 1000/-.**

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

## विश्वस्मिन्नद्भुतं सत्याग्रहान्दोलनम्

यदा गुरुमहाभागैरवलोकितं स्वकृतप्रयत्नेषु प्रेम्णा सादरं च विनत्यनन्तरमपि शासनं कर्णौ पिधायाक्षिणी निमील्यैवोप विष्टमस्ति तदा तैः स्वसहयोगिनः स्वयंसेवकान् राष्ट्रजीवने सत्यस्य न्यायस्य च प्रतिष्ठापनार्थं शाखाः प्रारब्धुमादिष्टम्। स्वस्यास्मिन्नाह्वाने गुरुभिः प्रोक्तं धर्मस्याधर्मेण, न्यायस्या-न्यायेन, उदारतायाः क्षुद्रभावेन, स्नेहस्य च दुष्टतया अयं संघर्षः। विजयो निश्चितः यतो धर्मेण सह परमेश्वरस्तेन च सह विजयः। अतएव हृदाकाशाज्जगदाकाशपर्यन्तं भारतस्य जयध्वनिमुच्चारयन्त उत्तिष्ठत। कार्यं च पूर्णं कृत्वैव विरमत भारतमातुर्जयः।

सत्याग्रहेतिनाम्ना प्रसिद्धस्यास्यान्दोलनस्य प्रारम्भे 9/12/48 दिने जाते एव कतिपयानां चतुःपंचसहस्राणां बालकानामिदमान्दोलनमिति मन्यमानाः नेतारोऽस्योपहासं चक्रुः। परं तद्विपरीतं कांग्रेसस्य कस्मिन्नप्यान्दोलने नैतादृशी संख्यासीत्। 77090 संख्यकैः स्वयंसेवकैर्विभिन्नस्थलेषु कारागाराः पूरिताः। एतदतिरिक्तं स्वयंसेवकानामभूतपूर्व-महिंसायुक्तमाचरणमपि जनैरवलोकितम्। आरक्षिणां दुराचारं शान्त्या सोढुं तेषामतुलनीयं मनःस्थैर्यमप्यवलोकितम्।

## विश्वस्मिन्नास्त्येतादृशमुदाहरणम्

एतेषां सम्पूर्णदृश्यानां दर्शकाः केचन तटस्थमहानुभावा अग्रण्यो भूत्वा शासकैः सह वार्त्तालापं कर्तुं वातावरणमनुकूलं भवेदित्याशयेन सत्याग्रहं रोद्धुं यदा अकथयन्, तदा गुरुमहाभागैस्तदनुकूलः आदेशः स्वयंसेवकेभ्यः प्रदत्तः। एतेषु मध्यस्थेषु चेन्नईप्रान्तस्य प्रख्याता उदारवादिनो विधिवेत्तारः श्रीमन्तः टी. आर. वेंकटरमणशास्त्रिण आसन्। तदा तैः पत्र-पत्रिकाभ्य एकं प्रदीर्घं वक्तव्यं प्रेषितमासीत्। यस्यान्ते ''प्रतिबन्धोऽयमन्यायपूर्णोऽस्ति यस्मिन् मूलभूतानां नागरिकाधिकाराणामुल्लङ्घनमस्ति अविवेकपूर्णोयमिति स्पष्टं प्रतिपादितमासीत्।''

अन्ते यदा सर्वकारेणावलोकितमस्माकं पक्ष अन्यायपूर्ण इति सार्वजनिकरूपेण प्रकटीभवति तदा संघस्य लिखितं संविधानं प्रस्तोतुं कथयित्वा प्रतिबन्धो निवारितः। गुरुमहाभागैः सहैव सर्वे कारागारतो मुक्ताः। स्मरणीयं यत्सर्वकारेण गान्धिहत्यातः प्रारभ्य येऽपि जघन्या आरोपाः प्रतिबन्धार्थमारोपितास्तेषामुपरि निवारणार्थं निमित्त-मात्रोऽयमुपायः। तस्मिन् समये पटेलमहोदयैर्यः सन्देशः प्रेषितस्तस्मिन् लिखितं संघस्योपरियोजितप्रतिबन्धनिवारणे यो हर्षो मह्यं जातस्तत्प्रमाणं तु तत्समये ये जनाः मम समीपे आसन् त एव वर्णयितुं शक्नुवन्ति। अहं शुभकामनाः प्रेषयामि।

जगत्येतादृशमुदाहरणं कदाचिदेव प्राप्तं भवेद् यत् एकतो राजशक्तिः यस्या नायकाः देशार्थं स्वातन्त्र्यप्रदाः इति जनमानसे श्रद्धया जनप्रियतायाः शिखरारूढाः स्युः येषां चाधीना महती सैन्यशक्तिः, आरक्षिणां पाशविकं बलं भवेत्, तथैव च प्रचारप्रसिद्धेः साधनानि स्युः तेषां सर्वेषां प्रयोगं कुर्वद्भिः कमपि सामान्यं जनसाधारणं व्यक्तिं दमयितुं यत्नः कृतो भवेत्। अपरतः तस्य व्यक्तेः समीपे केवलं कतिपयसहस्राणां तरुणानां किशोराणां च निष्ठा समर्पण-भावातिरिक्तमुपर्युक्तेषु साधनेषु कस्यापि नाम चिह्नमपि न स्यात्। यस्य चान्तःकरणे स्वस्वीकृतकार्यस्य, सत्यस्य न्यायस्य विजयविषयेऽसंदिग्धो विश्वासो भवेत्। यतो धर्मस्ततो जय इति ज्ञानिनामाश्वासने पूर्णा श्रद्धा भवेत्। एतादृशयोरुभयपक्षयोः संघर्षे अन्ते तस्यैव विजय इति विलक्षणोऽयं प्रसङ्गः।

सर्वमिमं घटनाक्रमं पठतां पाठकानां मनसि प्रश्नोऽयं समुदितः स्यात् यत् सर्वकारस्य नायकानां चेतसि सत्यमेव ''संघोऽपराधी'' इतिभावना स्थिता वा न वा। अस्य संशयातीतोत्तरार्थं तेषु दिवसेषु गृहमंत्रिणां पटेल-महाभागानामभिमतमेव पर्याप्तम्। गान्धिहत्यायाः एकमा-साभ्यन्तरे एव 26-2-48 दिने देशस्य प्रधानमंत्रिणं नेहरूमहोदयं लिखिते स्वपत्रे तैर्लिखितमासीत् गान्धिहत्या-काण्डे मया स्वयमेव पूर्णं ध्यानं प्रदत्तम्, सर्वं चावगतम्। तस्मिन् निरताः सर्वेऽपराधिनो धृताः। तेष्वेकोऽपि जनो राष्ट्रीयस्वयंसेवकसंघस्य नास्ति।

ब्रह्मपुरी, जयपुरम्

# भिक्षुकाय बहुमूल्यमूर्णावरणदानम्

❑ श्रीमती आराधना धर्माधिकारी

हिन्दीसाहित्यस्य प्रसिद्धं कविं सूर्यकान्तत्रिपाठिनं कोलकातानगरस्यैकः श्रेष्ठी बहुसम्मानेन पश्यतिस्म। स तेषामावश्यकतायाः बहु ध्यानं करोतिस्म। एको महान् मुद्रणालयस्तस्यासीत्। एकदा तेन बहुमूल्यमूर्णावरणमेकं तेभ्य उपहृतम्। एकस्मिन् दिने तीव्रशीतसमये ऊर्णावरणं परिधाय श्रेष्ठिनः कार्यालयं प्रति गच्छन्त आसन्। मार्गे तेभ्य एको भिक्षुकः शीतेन कम्पमानो मिलितः। तस्यैतादृशीमवस्थामवलोक्य करुणया कविमहोदया अतीव दुःखिता अभवन्। शीतेन कम्पमानं तमवलोक्य तैः स्वीयमूर्णावरणं तदुपरि प्रक्षिप्तम्। ऊर्णावरणेन तमुष्णता भासमाना अभवत्। स प्रसन्नः सन् कविमहोदयेभ्यो बह्वाशीर्वचनान्यवोचत्।

घटनाक्रममिदं सर्वं मुद्रणालयस्यैकः कार्यकर्ता अपश्यत् स च सर्वं श्रेष्ठिमहोदयेभ्यो न्यवेदयत्। श्रेष्ठिमहोदयास्त्वरितमेव बहिरागताः तैरवलोकितमेको भिक्षुकस्तैः प्रदत्तेनोर्णावरणेनावृत उपविष्टः। स कवि-महोदयमवदत्-भवता किमिदं कृतम्, बहुमूल्यमिदमूर्णावरणं भिक्षुकाय प्रदत्तम्?

श्रेष्ठिमहोदयस्य कथनं श्रुत्वा कविमहोदयैः कथितम् भवादृशानां महानुभावानां सत्वे ऊर्णावरणं तु पुनरागमिष्यति परं शीतेन कम्पमानस्यास्य यदि प्राणाः एव गमिष्यन्ति ते न प्रत्यागमिष्यन्ति। तत्पापं मह्यमपि यत अपेक्षितसहायस्य ज्ञात्वापि मया सहायता न कृतेति। श्रेष्ठिमहोदयाः निरुत्तरा अभवन्। तेषामाशयं विज्ञाय तैरन्येभ्योऽपि भिक्षुकेभ्यः सर्वेभ्यः कम्बलदानं कृतम्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

# सूक्ति-सुधा

❑ डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**दर्शनज्ञानवृत्तेन विना यः परमत्ति सः।**
**आहारं पशुरूपेण भारवाहो भविष्यति।।**

– जो सम्यक्, श्रद्धा, ज्ञान और आचरण-धारा के बिना मात्र शरीर के लिये (पेट भरने के लिये) ही आहार (भोजन) लेता है वह पशु रूप में भारवाहक होता है। (धर्मेण हीना पशुभिः समानाः)

**अन्ध एव वराकोऽसौ यो निजं नैव पश्यति।**
**शृणोति नैव सच्छास्त्रं बधिरः पापकारकः।।**

– जो निज आत्म देव को नहीं जानता वह बेचारा अन्धा ही है। और जो समीचीन शास्त्र (ज्ञान) को नहीं सुनता है,पाप को करने वाला बहरा है।

**यौवने कुरु भो मित्र! तपो दुःसहमञ्जसा।**
**जिनदीक्षां समादाय मुक्तिश्रीचित्तरञ्जिकाम्।।**

– हे मित्र! मुक्ति रूपी लक्ष्मी के चित्त को प्रसन्न करने वाली जिन दीक्षा लेकर युवावस्था में (मनुष्य जन्म को सार्थक) तप करो (इच्छा निरोधस्तपः)।

**पूजा दानं तपो धर्मं ज्ञानं वृत्तं च शक्यते।**
**यौवने न च वृद्धत्वे सर्वमाचरितुं स्वयम्।।**

– पूजा, दान, तप, धर्म, ज्ञान और चारित्र- इन सबका आचरण युवावस्था में ही किया जा सकता है, न कि वृद्धावस्था में।

**अज्ञानात् यत्कृतं पापं सज्ज्ञानात् तद् विमुच्यते।**
**ज्ञात्वा ज्ञानं कृतं पापं वज्रलेपः प्रजायते।।**

– अज्ञान से किया गया पाप सम्यग्ज्ञान से छूट जाता है। परन्तु ज्ञान से जानकर किया गया पाप वज्र लेप हो जाता है।

**वरं गार्हस्थ्यमेवेह न च वृत्तं कलङ्कितम्।**
**रागद्वेषमदोन्मादैरत्रामुत्र च दुःखदम्।।**

– इस लोक में गृहस्थ धर्म का पालन करना श्रेष्ठ है, परन्तु कलंकित हो दोषपूर्ण चारित्र का धारण करना श्रेष्ठ नहीं। इस लोक में राग-द्वेष मद से उन्मत्त होता है और पर लोक दुःखों को देने वाला है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**



# आद्यशंकराचार्यस्य आत्मबोधग्रन्थे

## ''आत्मबोधार्थं मोक्षसाधनवर्णनम्''

( गताङ्कादग्रे )

❑ युगल किशोर भारद्वाजः

अद्वैतसिद्धान्तस्य संस्थापकः विश्वेऽस्मिन् अध्यात्म-विद्यायाः बहुशः अमरग्रन्थानां सर्जकः आद्य जगद्गुरुशंकराचार्यः अनेक शताब्दीभ्य अस्माकं प्रेरणास्रोतरूपेण संस्थितः।

शंकराचार्येण विरचिताः ग्रन्थाः, स्तोत्राणि अस्माकं कण्ठहाररूपेण समादरं प्राप्नुवन्ति। अत्र उल्लेखनीयमस्ति यत् अत्र लेखकेन आत्मबोधादि आध्यात्मिकप्रेरणाप्रदग्रन्थानां अध्ययनानन्तरं, परमादरणीयदेवर्षिकलानाथशास्त्रीमहोदयानां उद्बोधनानन्तरं च डॉ. स्वामी राघवाचार्य वेदान्ती महाशयस्य आशीर्वादेन अस्य आत्मबोधग्रन्थस्य सहज-सरल-हिन्दीभाषायां लयबद्धपद्यात्मकानुवादं विद्वद्जनानां सम्मुखे संप्रस्तुतम्।

गद्यापेक्षया पद्यात्मकः काव्यानुवादः अधिकतरं ग्राह्यो भवति। अस्मिन् पद्यानुवादे मूलश्लोकस्य मौलिकभावार्थसहिता व्याख्याऽपि समाहिता।

स एवात्र मूलश्लोकानन्तरं पद्यानुवादोऽपि निम्नानुसारं प्रस्तुतः-

**( 1 ) ( मूलश्लोकः )**

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्।
मुमुक्षूणामपेक्षोऽयमात्मबोधो विधीयते।।

(भावार्थः)

आत्मबोध है सदा अपेक्षित, मोक्षमुक्ति जो चाहता है।
क्षीण हुये जब पाप तपों से, राग रहित हो जाता है।।
संसार बन्ध से मुक्ति चाहता, आत्मबोध वह पाता है।
राग रहित अरु क्षोभ रहित नर, परम शान्ति पद पाता है।

(2)

बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य वह्निवज्ज्ञानं, विना मोक्षो न सिध्यति।।

(भावार्थः)

यज्ञतपादि साधन करले, पर मुक्ति ज्ञान से होती है।
सामग्री सब विद्यमान पर, बिना अग्नि नहीं पकती है।।

(3)

अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याविद्यां निहन्त्येव, तेजस्तिमिरसंगवत्।।

(भावार्थः)

मैं मनुष्य हूं सुखी दुःखी हूं, यही अविद्या होती है।
मैं शुद्ध बुद्ध हूँ नित्यमुक्त हूँ, विद्या यही कहाती है।।
विद्या से ही नष्ट अविद्या, अन्धकार ज्यों ज्योति से।
जीव ब्रह्म के ऐक्यज्ञान बिन, मुक्ति न होती कर्मों से।।

(4)

परिच्छिन्न इवाज्ञानात् तन्नाशे सति केवलः।
स्वयं प्रकाशते ह्यात्मा, मेघापायेंऽशुमानिव।।

(भावार्थः)

सूर्यदेव ज्यों सदा प्रकाशित, आवृत मेघपुंज के हटने से।
आत्मदेव भी सदा प्रकाशित, आवरण अविद्या मिटने से।।

(5)

अज्ञानकलुषं जीवं, ज्ञानाभ्यासाद्धि निर्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्।।

(भावार्थः)

अज्ञान मलिन यह जीव तत्व, जब ज्ञानतत्व से निर्मल होता।
''साक्षीब्रह्म'' में यह बोध उदयकर, ज्ञान स्वयं भी लय होता।।

(6)

संसारः स्वप्नतुल्यो हि, रागद्वेषादिसंकुलः।
स्वकाले सत्यवद् भाति, प्रबोधे सत्यसद्भवेत्।।

(भावार्थः)

रागद्वेष से व्याप्त जगत् यह, सदा सत्य ही है लगता।
स्वप्नकाल में सत्य सा भासित, जागृत में है झूंठा लगता।।

(7)

तावत्सत्यं जगद् भाति, शुक्तिका रजतं यथा।
यावन्न ज्ञायते ब्रह्म, सर्वाधिष्ठानमद्वयम्।।

(भावार्थः)

वास्तविक ज्ञान हुये बिना, सीप रजत सम लगती ज्यों।
व्यापक ब्रह्म तत्व बिन जाने, सृष्टि सत्य सम जगती त्यों।।

(8)

सच्चिदात्मन्यनुस्यूते, नित्ये विष्णौ प्रकल्पिता।
व्यक्तयो विविधाः सर्वाः हाटके कटकादिवत्।।

(भावार्थः)

जैसे विविधाकृतिमय हो आभूषण, स्वर्ण सभी में व्याप रहा,
सत् चित् आतम महा विष्णु भी, जीव जगत् में व्याप रहा।।

(9)

यथाकाशो हृषीकेशो, नानोपाधिगतो विभुः।
तद् भेदाद् भिन्नवद् भाति, तन्नाशे सति केवलः।।

(भावार्थः)

व्यापक नभ भी घट पट मह में, भिन्न रूपमय भास रहा।
नष्ट हुये से घट पट मठ के, केवल नभ ही शेष रहा।।

**पूर्व अतिरिक्त निदेशकः, आयुर्वेद विभाग राजस्थान**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## श्रीकृष्णः सुदामा च

श्रीकृष्णस्य एकः सखा सुदामानामको ब्राह्मणो ब्रह्मवित्तमः विरक्तः जितेन्द्रियो गृहस्थश्चासीत्। तस्य भार्या पतिव्रता क्षुत्क्षामा स्वगृहस्य दारिद्र्यं असहमाना एकदा स्वपतिमभिगम्योवाच, 'ब्रह्मन्! भवतः सखा श्रीकृष्णः साक्षाच्छ्रियः पतिः ब्रह्मण्यः शरण्यश्चास्ति। हे महाभाग! साधूनां परायणं तमुपेहि, स तुभ्यं भूरि द्रव्यं दास्यति। सोऽधुना द्वारवत्याम् भोजवृष्ण्यन्धकेश्वरोऽस्ति। अतः स त्वयाऽवश्यं द्रव्यार्थं प्रार्थितव्यः।' एवं स्वभार्यया बहुशः मृदु प्रार्थितः सः मनसा गमनाय मतिं दधे। तेनोक्तम्, भद्रे! यदि किञ्चिदुपायनमस्माकं गृहे स्यात्तर्हि तस्य श्रीकृष्णस्य कृते दीयताम्। तया भार्ययाऽपि समीपस्थितान् विप्रान् याचित्वा चत्वारः मुष्टीन् तण्डुलानादाय चैलखण्डे तान् बद्ध्वा भर्त्रे उपायनम् अदात्।

सोऽपि विप्रवरः तान् तण्डुलानादाय द्वारकां प्रति प्रययौ! श्रीकृष्णदर्शनं मह्यं कथं स्यादिति चिन्तयन् स द्वारकापुरीं प्राप्तवान्। यदा स तां पुरीं प्राप्य श्रीकृष्णस्यावासं पृच्छन् राजप्रासादे प्रविष्टो बभूव तदा दूरात् तं विलोक्य रुक्मण्या सह पर्यङ्कमास्थितः श्रीकृष्णः सहसोत्थाय तस्य समीपं द्रुतगत्यागत्य मुदा तं दोर्भ्यामग्रहीत्। स्वप्रियस्य सख्युः विप्रर्षेरङ्ग-सङ्गातिनिर्वृतः कमलेक्षणः श्रीकृष्णः प्रीतः सन्नानन्दाश्रुबिन्दून् व्यमुञ्चत्।

तदनन्तरं तं प्रियवयस्यं पर्यङ्के उपवेश्य स्वहस्ताभ्यां श्रीकृष्णेन तस्य पादप्रक्षालनं कृतम्। तस्य पादोदकं च भगवाँल्लोकपावनः शिरसाऽग्रहीत्। तस्य देहं दिव्यगन्धे चन्दनागुरुकुङ्कुमैश्च व्यलिम्पत्। एवं तम् अभ्यर्च्य ताम्बूलं गां चावेद्य स्वागतवाक्यम-ब्रवीत्।

कुचैलं मलिनं क्षीणकायं श्रीसुदामाख्यं द्विजवरं देवी रुक्मिणी स्वयं चामरव्यजनेनार्चयत्। अन्तः-पुरजनो श्रीकृष्णेन सप्रीत्या समर्चितमवधूतं दृष्ट्वा विस्मितोऽभूत्।

श्रीकृष्णेनोक्तम्, हे ब्रह्मन्! दत्त्वा दक्षिणां गुरुकुलाद् भवता समावृत्तेन स्वविवाहः कृतो न वा? प्रायः गृहेषु धनेषु च ते चित्तमलिप्तमेवास्तीति मे विदितम्। कामविरहितचेतसः लोकसंग्रहार्थं त्वादृशा केचिदेव कर्माणि कुर्वन्ति।

पुनः प्रथमाश्रमस्य एकां घटनां स्मरन् श्रीकृष्ण उवाच 'हे ब्रह्मन्! गुरुसन्निधौ निवसताम् अस्माकमेकं वृत्तं किं त्वया स्मर्यते ? यदा आवां गुरुदारैः निर्दिष्टौ इन्धनानयने गतौ। महारण्ये प्रविष्टे सति वर्षाकालं विनैवासमये सुमहद् वातवर्षमभूत्, सूर्योऽस्तं गतवान्, दिशः तमसावृता बभूवुः सर्वत्र च भूप्रदेशो जलमयो जातः।'

आवां तत्र भृशं झञ्झावातप्रवाहैः निहन्यमानौ दिशोऽविदन्तौ परस्परं गृहीतहस्तौ वने परिभ्रमन्ता-वास्ताम्। निशावसाने सति यदा सूर्योदयोऽभूत्तदा कृष्णः सुदामा च द्वौ शिष्यौ रात्रौ वनमध्यान्नागतवन्तौ एतद् विदित्वा श्रीसान्दीपनिगुरुः स्वयमन्वेषमाणो वने आतुरौ आवाम् एकस्य वृक्षस्याधस्तले अपश्यत्। समीपमागत्य आचार्येणोक्तम् किं त्वया स्मर्यते? आचार्येणोक्तमासीद्, अहो! हे पुत्रकौ युवामस्मदर्थे अतिदुःखितौ। प्राणिनामात्मा श्रेष्ठः किन्तु युवां तमप्यनादृत्य मत्सेवापरायणौ अभूताम्। एतदेव हि सच्छिष्यैः कर्तव्यम् यत्तेषां विशुद्धभावेन स्वसर्वस्वं गुरोः कृते अर्पितं स्यात्। गुरुवर्येण तदनन्तरं हर्षोत्फुल्लहृदयेनेदमाशीर्वचनमुक्तम्, 'भो द्विजश्रेष्ठौ तुष्टोऽहम्, युवयोः मनोरथाः सत्याः सन्तु।' इति।

इत्थंविधान्यनेकानि प्रसङ्गानि। नास्त्यत्र संदेशो यत् गुरोरनुग्रहेणैव पुमान् पूर्णत्वमात्मसंतोषमपि च प्राप्नोति इति।

श्रीकृष्णः स्वप्रियं सुदामाब्राह्मणं प्रोवाच, ''भवता स्वगृहात् मदर्थं किमुपायनमानीतम्'' इति पुनः तेनोक्तम् 'यो मे भक्त्या पत्रं पुष्पं फलं तोयं वा प्रयच्छति प्रयतात्मा तदहं भक्त्युपहृतम् अश्नामि।' इत्युक्तोऽपि स सुदामा द्विजः व्रीडितः श्रियः पतये श्री कृष्णाय तण्डुलप्रसृतिं अवाङ्मुखः न प्रायच्छत्। सर्वभूतात्मदृक् श्रीकृष्णः तस्य सुदाम्न आगमन-कारणं विज्ञाय अचिन्तयत्, 'अयं श्रीकामः पुरा मां नाऽभजत्। पतिव्रतायाः पत्न्याः प्रियचिकीर्षया मां प्राप्तोऽस्ति। अतः अस्य अमर्त्यदुर्लभाः सम्पदो दास्यामि।' इति विचिन्त्य तस्य सुदाम्नः वसनाच्ची-रबद्धान् तण्डुलान् 'किमिदमिति' कथयन् स्वयमेव जहार। तेनोक्तम्, 'प्रियसखे, नन्वेदमुपनीतं मे परमप्रीणनमस्ति।' श्रीकृष्णः यदा एकां तण्डुलमुष्टिं जग्ध्वा द्वितीयां जग्धुमाददे तावत् श्रीरुक्मिणी श्रीकृष्णस्य हस्तं गृहीत्वा 'सर्वसम्पत्समृद्धये एतावदलम्' इत्युवाच।

श्रीसुदामा ब्राह्मणः श्रीकृष्णस्य मन्दिरे तस्यां रात्रौ उषित्वा विभिन्नानि व्यञ्जनानि भुक्त्वा मधुररसान् पीत्वा आत्मानं स्वर्गगतमेव मेने। द्वितीये दिने श्रीकृष्णात् धनम् अलब्ध्वा स्वालयं जगाम। तेन द्विजवरेण स्वगृहे गच्छता मार्गे चिन्तितम् यत् क्वाहं दरिद्रो ब्राह्मणः क्व च श्रीनिकेतनः श्रीकृष्णः किन्तु श्रीकृष्णेन ब्रह्मबन्धुरिति सम्बोध्य अहं बाहुभ्यां परिरम्भितः।

तदनन्तरं तेन स्वभ्रातरमिव स्वपर्यङ्के निवासितः, रुक्मणीदेव्या स्वहस्तेन श्रान्तो वीजितः, देवदेवेन श्रीकृष्णेन पादसंवाहनादिभिः परमया शुश्रूषया देववत् पूजितः। इदमपि पुनः तेन विचारितं यत् श्रीकृष्णेन एतद्विचिन्त्य एव मह्यं धनं न दत्तं यत् 'अधनोऽयं धनं प्राप्य मदमत्तो न मां स्मरेदिति'

एवं चिन्तयन् सः निजगृहान्तिकं प्राप्य सूर्यानलेन्दुसदृशैः प्रदीप्तनिकेतनैः सर्वतः व्याप्तं भूप्रदेशं दृष्ट्वा, कूजद्द्विजकुलाकुलैः, विचित्रो-पवनोद्यानैः समलंकृतं प्रदेशं विलोक्य व्यचारयत् यत् 'किमिदम्, कस्य वा स्थानं, कथमिदमित्थम-भूदिति।' एवं विचिन्तितं तं महाभागं नराः नार्यः भूयसा गीतवाद्येन अगृह्णन्। स्वपतिमागतम् आकर्ण्य सा द्विजपत्नी तत्क्षणमेव गृहात् निश्चक्राम। पतिव्रता सा स्वपतिं दृष्ट्वा तस्य चरणकमलयोः अनमत्। दासीनां मध्ये सुशोभितां पत्नीं वीक्ष्य स विस्मितोऽभूत्। तदनन्तरं स प्रीतः सन् स्वपत्न्या युक्तः निजमन्दिरं प्रविष्टोऽभूत्। मणिस्तम्भशतोपेतं महेन्द्रभवनवत् तं भवनं विलोक्य परमविस्मितो बभूव। अतः प्रदेशेषु पयःफेननिभाः शय्याः सम्मुन्नताः पर्यङ्का हेमदण्डानि चामरव्यजनानि हैमानि आसनानि तेषामुपरि मृदूपस्तरणानि, मुक्तादाम-विलम्बीनि वितानानि, स्वछस्फटिक-कुड्येषु महामारकतेषु भाजमानान् रत्नदीपान् विलोक्य स ब्राह्मणः सा समृद्धिः सर्वसम्पद् यदूत्तमस्य श्रीकृष्णस्य कृपाकटाक्षेणैव समागता इति तर्कयामास। इति।

## श्रीकृष्ण सुदामा

श्रीकृष्ण के एक सखा सुदामा नामके ब्राह्मण ब्रह्मवेत्ताओं में श्रेष्ठ, विरक्त, जितेन्द्रिय और गृहस्थ थे। उनकी स्त्री पतिव्रता, भूखी रहने से कृशकाय अपने घर के दारिद्र्य को न सहन करती हुई एक बार अपने पति के पास आकर बोली, 'हे ब्रह्मन्! आपके सखा श्रीकृष्ण साक्षात् लक्ष्मी के पति ब्राह्मणों के परमभक्त हैं। हे महाभाग! साधुओं के आश्रय उनके पास जाओ, वे आपको बहुत सा धन देंगे। वे अभी द्वारकापुरी में भोज, वृष्णि और अन्धकों के स्वामी हैं। अतः वे द्रव्य के लिए अवश्य प्रार्थना करने योग्य हैं। इस प्रकार अपनी भार्या के

द्वारा अनेक बार मृदु प्रार्थना करने पर उनने श्रीकृष्ण के पास जाने का मन में निश्चय किया। उनने कहा, भद्रे! अगर कुछ भेट देने योग्य वस्तु अपने घर में हो तो उन श्रीकृष्ण को देने हेतु लाओ। उन श्रीसुदामाजी की स्त्री ने भी पडोस में रहने वाले ब्राह्मणों के यहां से मांग कर चार मुट्ठी तण्डुल (चिवड़ा) लाकर चिथडे में उन्हें बांध कर अपने पति को भेंट दे दी।'

उस ब्राह्मणश्रेष्ठ ने भी उस चिउड़े को लेकर द्वारका की ओर प्रस्थान कर दिया।' श्रीकृष्ण का दर्शन मुझे किस प्रकार होगा। यह चिन्ता करते हुए वे द्वारकापुरी पहुँचे। जब वे उस पुरी में आए तो श्रीकृष्ण का निवास पूछते हुए राजमहल में चले गए। तब दूर से ही उनको देखकर रुक्मिणीजी के साथ पलंग पर बैठे हुए श्रीकृष्ण तत्काल उठकर उनके (सुदामाजी के) समीप झट से आकर अत्यन्त हर्षित होते हुए उनको (श्रीसुदामाजी को) दोनों हाथों को बाहों में भर लिया। अपने प्रियमित्र विप्र ऋषि के अङ्गसङ्ग से गद्‌गद हुए कमलोचन भगवान् श्रीकृष्ण आनन्दाश्रु बिन्दु छोड़ने लगे।'

इसके पश्चात् उस प्रिय सखा को पलंग पर बिठाकर अपने दोनों हाथों से श्रीकृष्ण ने उनका पादप्रक्षालन किया। और उनका पादोदक उन लोकपाल भगवान् ने अपने मस्तक पर लगाया। उनकी देह को दिव्य गन्ध से चन्दन अगर और कुंकुम से लीप दिया। इस प्रकार उनकी अर्चना करके उनको ताम्बूल पान और गाय देकर वाणी द्वारा उनका स्वागत किया।

मैले कपड़े वाले मलिन शरीर वाले कृशकाय श्रीसुदामा नाम के ब्राह्मणश्रेष्ठ की देवी रुक्मिणी भी स्वयं चमर ढुलाकर सेवा करने लगी। अन्त:पुर के लोग श्रीकृष्ण द्वारा प्रीति पूर्वक अर्चना किए गए अवधूत को देखकर विस्मित हुए।

श्रीकृष्ण ने कहा, हे ब्रह्मन् ! गुरुदक्षिणा देकर गुरुकुल से आकर आपने अपना विवाह किया या नहीं? प्राय: घर में और धन में आपका चित्त अलिप्त ही है यह मुझे ज्ञात है। विषयों से विरक्त चित्तवाले आप जैसे कोई ही पुरुष लोकसंग्रह के लिए ही (निर्लिप्त) कर्म करते हैं।

फिर ब्रह्मचर्याश्रम की एक घटना का स्मरण करते हुए श्रीकृष्ण ने कहा, 'हे ब्रह्मन्! गुरु के सन्निकट रहते हुए अपनी एक घटना को क्या आप स्मरण करते हैं? जब हम दोनों गुरु पत्नी के द्वारा आज्ञा करने पर इन्धन (लकड़ी) लेने गए थे। महा बन में घुसने पर वर्षाकाल के बिना ही असमय में बहुत अधिक हवा और वर्षा हुई, सूर्यास्त हो गया, दिशाओं में अन्धकार छा गया और सर्वत्र भूप्रदेश जलमय हो गया था।'

हम दोनों वहां अत्यधिक झंझावात के प्रवाह द्वारा पिटते हुए दिशा ज्ञान न होने के कारण आपस में हाथ पकड़े हुए जंगल में चक्कर लगाते रहे। रात्रि बीतने पर जब सूर्योदय हुआ तब, 'कृष्ण-सुदामा दोनों शिष्य रात्रि में वन में गए नहीं लौटे, यह जानकर श्रीसान्दीपनि गुरु स्वयं खोजने के लिये निकले।' वन में व्याकुल हम दोनों को एक वृक्ष के नीचे देखा। समीप में आकर आचार्य जी बोले क्या तुम्हें स्मरण है? आचार्य ने कहा था, अहो! हे बालकों! तुमने हमारे लिये बहुत दु:ख झेले। प्राणियों के लिये आत्मा श्रेष्ठ है किन्तु तुम दोनों ने उसका भी अनादर करके मेरी सेवा में परायण रहे। यही अच्छे शिष्यों का कर्त्तव्य है कि उनका विशुद्धभाव से अपना सर्वस्व गुरु के लिए अर्पण हो। इसके पश्चात् गुरुवर्य ने हर्षोत्फुल्ल हृदय से यह आशीर्वाद दिया था, हे द्विजश्रेष्ठो! मैं 'तुम पर संतुष्ट है। आपके मनोरथ सफल हो।' इस प्रकार के अनेक प्रसङ्ग गुरु घर में निवास करते हुए हो गए इसमें संदेह नहीं कि गुरु के अनुग्रह से ही मनुष्य पूर्णता की और आत्मसंतोष को भी प्राप्त करता है। इति।

श्रीकृष्ण अपने प्रियमित्र सुदामा ब्राह्मण को हंस कर बोले, 'आपने अपने घर से मेरे लिये क्या भेंट लाये।' फिर उनने कहा 'जो मुझको भक्तिपूर्वक पत्र, पुष्प, फल वा जल देता है उस मेरे भक्त का मैं भक्तिपूर्वक दिया हुआ ग्रहण करता हूँ।' इस प्रकार कहा हुआ भी वह सुदामा द्विज लज्जित हुआ लक्ष्मीपति श्रीकृष्ण के लिये चिउड़े की उस मुट्ठी को नहीं दिया और नीचे मुंह किये रहा। सम्पूर्ण प्राणियों को आत्मदृष्टि से पहचानने वाले श्रीकृष्ण उस सुदामा के आगमन के कारण को जानकर सोचा कि 'यह धनप्राप्ति की इच्छा से पहले मुझे नहीं मिला। पतिव्रता पत्नी के हित की इच्छा से मुझे मिला है। अतः इसको अत्यन्त दुर्लभ संपत्ति दूंगा।' चह विचार करके उनने उस सुदामा के कपड़ों में से चिथड़े में बंधे चिवड़े को 'यह क्या है' यह कह कर स्वयं ही उससे छीन लिया। उनने कहा, प्रियप्रित्र, यह भेंट तो सत्य ही मुझे बहुत प्रिय है 'श्रीकृष्ण जब एक मुट्ठी चिवड़ा खाकर दूसरी खाने लगे, तब श्री रुक्मिणीजी ने श्रीकृष्ण का हाथ पकड़ कर सब प्रकार की सम्पत्ति और समृद्धि के लिए इतना ही बहुत है यह कहा।'

श्री सुदामा ब्राह्मण श्रीकृष्ण के महल में उस रात्रि को रहकर भिन्न भिन्न प्रकार के व्यञ्जन खाकर मधुर रसों को पीकर अपने आपको स्वर्ग में गए हुए की तरह समझा। दूसरे दिन श्रीकृष्ण द्वारा धन प्राप्त किए बिना ही (सुदामा) अपने घर को लौट पड़े। उनने स्वयं भी कुछ नहीं मांगा था। इस श्रेष्ठ ब्राह्मण ने अपने घर जाते हुए मार्ग में सोचा कि 'कहां तो मैं दरिद्र ब्राह्मण और कहां लक्ष्मी जिनके घर में ही निवास करती है ऐसे श्रीकृष्ण, किन्तु श्रीकृष्ण ने ब्रह्मबन्धु यह सम्बोधन करते हुए मुझे अपने हाथों से आलिङ्गन दिया। इसके पश्चात् उनने अपने भाई की तरह अपने पलंग पर बिठाया। रुक्मिणी देवी ने अपने हाथ थके हुए मुझे पंखा झला। देवों के देव श्रीकृष्ण ने पांवों के प्रक्षालनादि द्वारा अत्यधिक शुश्रूषा करते हुए देवता की तरह मेरी पूजा की।' यह भी फिर उसने सोचा कि श्रीकृष्ण ने यह विचारते हुए ही मुझको धन नहीं दिया है कि 'दरिद्री यह धन प्राप्त करके मदमत्त हुआ मुझे स्मरण नहीं करेगा।'

इस प्रकार चिन्ता करते हुए यह (सुदामा) अपने घर के समीप आकर सूर्य, अग्नि, चन्द्र सदृश चमकते हुए घरों से व्याप्त उस भूप्रदेश को देखकर, शब्द कर रहे पक्षीगणों से व्याप्त विचित्र उपवनों और उद्यानों से शोभायमान प्रदेश को निहार कर सोचा कि, 'यह क्या है' यह कौन सा स्थान है? यह ऐसा किस प्रकार हो गया। इस प्रकार चिन्ता करते हुए उस महोदय का मनुष्यों, स्त्रियों ने खूब गाने बजाने के साथ उनका स्वागत किया। अपने पति के आगमन की बात सुन कर वह ब्राह्मण पत्नी भी उसी समय घर से निकल पडी। पतिव्रता उसने अपने पति को देखकर उसके चरण कमलों में नमन किया। दासियों के मध्य में सुशोभित अपनी पत्नी को देखकर वह (सुदामा) विस्मित हो गया। इसके पश्चात् वह प्रसन्न होकर अपनी पत्नी के साथ अपने निवास (घर) में घुसा। सैकड़ों मणियों के खम्भों से युक्त महेन्द्र के भवन की तरह उस भवन को देखकर अत्यन्त विस्मत हुआ। अन्दर के कमरों में दूध के झाग के सदृश शय्याओं को, उंचे पलंगों को, व सोने के दण्डों वाले चंवरों को सोने के आसनों को और उनके ऊपर कोमल चद्दरों को मोतियों की लड़ों वाले परदों को, स्वच्छ स्फटिक की दीवारों पर लाल श्रेष्ठ मरकत मणियों पर शोभायमान रत्नों के दीपकों को देखकर वह ब्राह्मण उस सारी समृद्धि को और सभी सम्पदा को यादव कुल में उत्तम श्रीकृष्ण की कृपा से सब आई है यह समझा।

**किशनपोल बाजारः, जयपुरम्**

नारी-स्तम्भः

# रासमणी राराजते

❑ डॉ. राजेश्वरी भट्ट

आत्मबलेन जनबलेन च सततं जनहितसाधिका कल्याणयज्ञेऽस्मिन् बाधामूर्तैर्नृशंसैर्ब्रिटिशशासकै-र्विरचितानां कुचक्राणां षडयन्त्राणाञ्च भेदिका, 'रानी रासमणि' नवजागरणकाले बंगदेशस्य विशिष्टविभूति-रूपेण लोके स्मर्यते। शक्तिभक्तिविरक्त्यादीनां सद्गुणानां प्रत्यक्षमूर्तिः 'रानीरासणि' 26 सितम्बर 1793 तमे वर्षे कोलकातानगरे कोला ग्रामे धीवरस्य गृहे जनिमलभत। जन्मनैव अप्रतिमरूपसम्पन्ना कन्या 'रासमणि' परिजनानामागन्तुकानाञ्च मनांस्यावर्जयत्। अनिन्द्य रूपसम्पन्नाया रासमणेर्वयसः एकादशवर्षाण्ये-वातीतानि यदा रासमणेः रूपातिशयेन मुग्ध उच्चकुलीनो भूस्वामी रामचन्द्रो जातिवर्ण वर्ग वयसां वैषम्यमुपेक्ष्य हर्षेण दृढाग्रहेण च धीवरकन्यां रासमणिं सहचरीरूपेण अवृणोत्। अनन्यरूपेण सहैव शीलादिभिर्गुणैः सम्पन्ना नववधू रासमणि जनबाजारे स्थिते शतत्रयकक्षैर्युक्ते भव्यभवने निवसतां परिजनानां आचार-विचार व्यवहारादिभिः सुपरिचिता जले लवणमिव अभिन्ना च जाता। शनैः शनैः परिवारस्य सुप्रबन्धनेन सहैव भर्त्रा सह वर्षाणि यावत् व्यवसायप्रबन्धने, जनहितकार्येष्वपि, संविभागं कुर्वती रासमणिः समाजे लोकप्रियता-मधिगतवती। सहसा भर्तुः रामचन्द्रस्य निधनं जातम्। सम्प्रति रासमणेः द्विविधं दायित्वं दृढतरं जातम्। अनेकशः क्रूरान् ब्रिटिशशासकान् भग्नमनोरथान् कुर्वती रासमणिः लोकहितकार्याणि सम्पादितवती। अस्मिन् क्रमे मत्स्यकरमाध्यमेन धीवराणां शोषणं कर्त्तुमुद्यतैः हिंसायै प्रवृत्तैर्ब्रिटिशाधिकारिभिः सह जनसहयोगेन संघर्षरता 'रासमणिः' क्रूरकर्मणां विदेशीयानां प्रयत्नं विफलं कृतवती। एवमेव दुर्गापूजामहोत्सवे दुर्गापूजायात्राया विरोधे उत्थितैः सशस्त्रैः ब्रिटिशरक्षिभिः सह जनबलेन धर्मरक्षायै प्राणान्करतले कृत्वा दुर्गायात्रा-महोत्सवं सम्पन्नं कृतवती। कालेन परिवारस्य दायित्वेन उत्तृणा रासमणिः सर्वथा समाजसेवायै समर्पिता जाता। अस्मिन् क्रमे गंगास्नानार्थिनां तीर्थयात्रिणां सुविधायै रानीरासमणिं विशालसेतोनिमार्णं कारितवती। ततो हुगलीनद्यास्तीरे बाबूघाट, अहीरघाट नीमतलादीनां स्नान स्थलानां निर्माणमकारयत्। एतदतिरिक्तं 'रानीरास-मणिः' इम्पीरियललाइब्रेरी हिन्दू कॉलेज सहैव कोलकातानगरे अनेकासां संस्थानां कृते वित्तीयसहायतां विधाय समाजे प्रतिष्ठिता जाता। आत्मना विहितैः सत्कर्मभिः रानी रासमणि 'रानी माँ' लोकमाता इत्यादिभिः सम्मान्यैरुपाधिभिरलंकृता जाता। परिवार-समाजयोः कार्यैः सन्तुष्टा रासमणि इदानीम् तीर्थयात्रायै गन्तुम् उद्यताऽऽसीत्, तदैव स्वप्ने कालीदेवी स्वयं प्रत्यक्षीभूत्या तस्यै काली मन्दिरस्य निर्माणाय आदिदेश। देव्याश्देशं शिरोधार्य 'रानीरासमणि' हुगलीनद्यास्तटे 'भवतारिणीदेव्या' मन्दिरस्य निर्माणमकारयत्। इदं मन्दिरं सम्प्रति आगन्तुकानां दर्शनार्थिनाञ्च कृते तीर्थीभूतं जातम्। पूर्वं जातिगतवैषम्येन ग्रस्ते समाजे मन्दिरस्य पुरोहितपदं स्वीकर्त्तुं कोऽपि सम्मुखो नाऽभवत् ततो रासमणेः परया भक्त्या द्रवितेन पश्चात् 'परमहंस' इति उपाधिना भूषितेन स्वामीरामकृष्णपरमहंसेन इदं दायित्वं स्वीकृतम्। रानीरासमणेः दृढभक्त्या चमत्कृतेन स्वामी-रामकृष्णयोगिना सा देवीरूपेणाराधिता। 19 फरवरी 1861 तमे वर्षे शक्तिभक्त्योरधिष्ठात्री लोकमाता रानीरासमणिः पार्थिवदेहं विहाय द्युलोकं प्रस्थितवती। किन्तु आजीवनं लोकहितमाचरन्ती सा आत्मनाऽऽचरितैः सत्कार्यैं अद्यापि कोलकातानगरे यशःशरीरेण विद्यमाना विद्यते। कोलकातानगरे 'रासमणि एवेन्यू' इति स्थले रानी रासमणेः प्रतिमा विराजते। हुगलीतटे दक्षिणेश्वर कालीमन्दिरस्य प्राङ्गणे रानीरासमणेर्मन्दिरं शोभते। कोलकतानगरस्य प्रमुखे कर्जनपार्के रानीरासमणेः प्रतिमा विराजते। कोलकातानगरस्य विभिन्नक्षेत्रेषु रासमणेः नाम्नाऽनेके मार्गाः सन्ति। एतदतिरिक्तं रानीरासमणेः प्रेरणास्पदं जीवनमाधारीकृत्य दूरदर्शन-माध्यमेन धारावाहिककार्यक्रमस्य प्रसारणं कृतम्। एवमेव रासमणेः दिव्यचरित्रमुदघाटनार्थम् एकस्य चलचित्रस्य प्रदर्शनं कृतम्। 1993 तमे वर्षे भारतीय-डाकतार विभागेन रानीरासमणिं प्रति श्रद्धासुमनसमर्पितुं विशेषं डाकटिकिटं प्रसारितम् आत्मनः कल्याणकरैः कार्यैं रासमणि नारीपथप्रदर्शिकाऽस्ति।

## हिन्दी अनुवाद

आत्मबल एवं जन सहयोग से निरन्तर जनहित साधिका, इस जनकल्याणयज्ञ में बाधा उत्पन्न करने वाले नृशंस ब्रिटिश शासकों द्वारा रचित कुचक्रों एवं षडयंत्रों की भंजिका, 'रानी रासमणि' बंगदेश में नवजागरणकाल की विशिष्ट विभूति के रूप में स्मरणीया है। शक्ति भक्ति एवं विरक्ति की प्रत्यक्षमूर्ति 'रानी रासमणि' ने 26 सितम्बर 1973 ई में एक कृषिजीवी 'धीवर' के घर जन्म लिया। जन्म से ही अनुपम रूपसम्पन्ना कन्या 'रासमणि' जब केवल 11 वर्ष की हुई तभी उसके अप्रतिम सौन्दर्य से मुग्ध उच्चकुल में उत्पन्न 'जमीदार' रामचन्द्र ने जाति, वर्ण-वर्ग तथा आयु की उपेक्षा कर अत्यन्त प्रसन्नता एवं दृढ आग्रह से धीवर कन्या रासमणि को अपनी सहचरी के रूप में वरण किया। शीघ्र ही रूप एवं शीलादि गुणों से सम्पन्न नववधू रासमणि कलकत्ता में 'जसबाजार' में स्थित (300) तीन सौ कमरों से युक्त भव्य भवन में निवास करने वाले परिजनों के आचार, विचार व्यवहारादि से सुपरिचित होकर जल में नमक की भाँति घुलमिल गई। धीरे-धीरे परिवार के सुप्रबन्धन के साथ-साथ अपने पति के व्यवसाय प्रबन्धन में तथा जनहित कार्यों में भी भागीदार बनकर अत्यन्त लोकप्रियता प्राप्त की। सहसा पति रामचन्द्र का निधन हो गया, अनेक बार जनहित कार्यों में बाधा करने वाले ब्रिटिश शासकों के प्रयास को विफल करते हुए रासमणि ने लोकहित कार्य को गति प्रदान की। इस क्रम में 'मछली कर' माध्यम से धीवरों का शोषण करने को हिंसा के लिए प्रवृत्त ब्रिटिश शासकों के साथ जनसहयोग से संघर्ष करते हुए रासमणि ने उनके प्रयत्न को विफल कर दिया। इसी प्रकार दुर्गापूजा के विरोध में सम्मुख आए हुए शस्त्रधारी विदेशियों के साथ जनसहयोग से प्राणों को हथेली पर रख कर धर्म की रक्षा करते हुए दुर्गा पूजा महोत्सव को सम्पन्न किया। समय से परिवार के दायित्व से मुक्त होकर 'रासमणि' समाजसेवा के लिए समर्पित हो गई। इसक्रम से रासमणि ने गंगास्थानार्थियों की सुविधा के लिए विशाल पुल का निर्माण करवाया। हुगली नदी के तट पर बाबूघाट, अहीरघाट नीमतला आदि अनेक घाटों का निर्माण करवाया। इसके अतिरिक्त रानीरासमणि ने 'इम्पीरियल लायब्रेरी', हिन्दू कॉलेज साथ ही कोलकाता नगर की अनेक संस्थाओं के लिए वित्तीय सहायता प्रदान कर समाज में प्रतिष्ठा प्राप्त की। अपने द्वारा किए गए सत्कर्मों के कारण 'रासमणि' कलकत्ता निवासियों के द्वारा रानी माँ, लोकमाता इत्यादि सम्मान्य उपाधियों से अलंकृत हुई। पारिवारिक एवं सामाजिक कार्यों से सन्तुष्ट रासमणि ने तीर्थयात्रा के लिए जाने का निश्चय किया तभी स्वप्न में कालीदेवी ने स्वयं प्रत्यक्ष होकर उन्हें काली मन्दिर के निर्माण का आदेश दिया। काली के आदेश को शिरोधार्य कर रानीरासमणि ने 'हुगली नदी' के तट पर 'भवतारिणाी देवी' के मन्दिर का निर्माण करवाया। यह मन्दिर आगन्तुकों एवं दर्शनार्थियों के लिए तीर्थ के सम्मान पवित्र माना जाता है। पूर्व में जातिगत वैषम्य के कारण कोई भी इस मन्दिर का पुजारी बनने को तैयार नहीं हुआ। किन्तु 'रासमणि' की परम भक्ति से द्रवित एवं चमत्कृत परमहंस स्वामी रामकृष्ण योगी ने यह दायित्व स्वीकार किया स्वामी रामकृष्ण परमहंस ने परम भक्त रानी रासमणि को देवी के समान माना एवं आराधना की। 19 फरवरी 1861 ई में रानी रासमणि ने पार्थिव शरीर को त्याग कर द्युलोक प्रस्थान किया किन्तु आजीवन लोकहित करने वाली शक्ति भक्ति की अधिष्ठात्री अपने द्वारा किए गए सत्कर्मों से आज भी कोलकाता नगर में यश शरीर से विद्यमान हैं। कोलकाता नगर के 'रासमणि एवेन्यू' में रासमणि की प्रतिमा स्थापित है। हुगली तट के दक्षिणेश्वर काली मन्दिर के प्रांगण में रासमणि का मन्दिर सुशोभित है।

इसी क्रम में कोलकाता के प्रसिद्ध 'कर्जन पार्क' में रानी रासमणि की मूर्ति सुशोभित है। इसी प्रकार कोलकाता नगर के विभिन्न क्षेत्रों मे ंअनेक मार्ग रानी रासमणि के नाम पर स्थित हैं। रानी रासमणि के जीवन को महिमा मण्डित करने के लिए उनसे प्रेरणा प्राप्त करने के लिए दूरदर्शन माध्यम से एक धारावाहिक कार्यक्रम का प्रसारण किया गया। इसी कड़ी में रानी रासमणि के अलौकिक जीवन चरित्र को उद्घाटित करने के लिए 'चलचित्र' का प्रदर्शन किया गया। 1993 ई में भारतीय डाकतार विभाग के द्वारा 'रानी रासमणि' को श्रद्धा सुमन अर्पित करने के लिए विशेष डाक टिकट का प्रसारण किया गया। रानी रासमणि अपने द्वारा किए गए जन हित कार्यों से नारी पथ प्रदर्शिका हैं।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# वर्षासु सेवनीयाः कषायाः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**आदानकाले भूमेः शरीरस्य च सौम्यांशस्य क्षपणं भवति। आदानकालस्य प्रारम्भस्तु शिशिरतः भवति, श्रेष्ठबलाधानकारकस्य विसर्गस्वरूपात्मकस्य हेमन्तर्तोरनन्तरमेव समापतितेऽस्मिन्नादानस्वरूपात्मकेऽपि कालखण्डे बलस्य श्रेष्ठत्वं भवति शरीरे, किन्तु शनैः शनैः आदानकालप्रभावात् तदनुरूपञ्चौषधान्नविहारोणां सेवनात् शारीरबलस्य क्षपणं भवति।**

आदानकाल में भूमि के तथा शरीर के साम्य अंश का क्षपण (क्षय) होता है। आदानकाल का प्रारम्भ तो शिशिरऋतु से होता है। श्रेष्ठ बलाधान करने वाली विसर्गस्वरूपात्मक हेमन्त ऋतु के बाद ही आने वाले इस आदानस्वरूपात्मक कालखण्ड में शरीर में बल की श्रेष्ठता होती है। किन्तु शनैः शनैः आदानकाल के प्रभाव से तथा उस के अनुरूप ही औषध-अन्न एवं विहार का सेवन करने से शरीर के बल का क्षय होता है।

**तदनन्तरमादानमध्यात्मकस्य वसन्तर्तोरागमनम्भवति, कालेऽस्मिन् विसर्गकालप्रधाने हेमन्ते कालप्रभावात् सञ्चितस्य श्लेष्मणः दिनकृद्दीधितिभिरीरणं भवति, सः विलायितः श्लेष्मा कायाग्निं बाधते पूर्वं ततः बहून् रोगान् प्रकुरुते।**

उसके बाद आदान के मध्यकालस्वरूप वसन्त ऋतु का आगमन होताहै।इस काल में विसर्गकालप्रधान ऋतु हेमन्त में काल के प्रभाव से सञ्चित श्लेष्मा का सूर्य की किरणों से प्रेरण होता है। वह प्रेषित पिघला हुआ श्लेष्मा पहले कायाग्नि को बाधित (पीडित) करता है, उसके बाद अनेक रोगों को उत्पन्न करता है।

**क्रमागते त्वादानकाले यदाऽन्तिमः ग्रीष्मर्तुः समापतति तदा तु भीष्मः भास्करः गभस्तिभिर्जगतः (स्थावरजङ्गमानां) स्नेहं पेपीयते, परिणामतः दुर्बलत्वमधिगच्छति शरीरम्। देहस्य दुर्बलत्वे पक्ताऽपि दुर्बलो भवति, देहबलानुविधायित्वाद्वह्नेः। स पक्ता वर्षाकाले विशेषेण दुर्बलो भवति। आदानाहित-मग्निमान्द्यं वर्षाकाले त्रिदोषप्रकोपे सहायकं भवति।**

क्रमशः आये हुए आदानकाल में जब अन्तिम ऋतु ग्रीष्म आती है। तब तो अति भयङ्कर भास्कर अपनी (तीव्र) किरणों से संसार (स्थावर एवं जङ्गम)के स्नेह को अत्यधिक पीता है। जाठराग्नि की देहबल की अनुविधायिता (तदनुरूप कार्य करने वाली) होने के कारण देह के दुर्बल होने पर पक्ता (जाठराग्नि) भी दुर्बल हो जाता है। वह पक्ता वर्षाकाल में विशेष रूप से दुर्बल हो जाता है। आदानकाल से व्यवस्थापित अग्निमान्द्य वर्षाकाल में त्रिदोष प्रकोप में सहायक होता है।

**एतदतिरिक्तं वर्षासु भूबाष्पान्मेघनिष्यन्दाज्जलस्य चाम्लपाकस्वभावादनिलादीनां दोषाणां प्रकोपणम्भवति। भूबाष्पः प्रभावादेव त्रिदोषप्रकोपकः। मेघनिष्यन्दो वातश्लेष्मकारकः। जलस्य वर्षास्वभावकृताम्लपाकता पित्तश्लेष्मकरी। अग्निमान्द्यञ्चापाकविदाहाभ्यां कफपित्तकारि,**

**धातुपोषकरसानुत्पादाच्च धातुक्षयेण वातकारि। एतेन वर्षास्वग्निमान्द्येन वातादिकोपः, वातादिकोपेन चाग्निमान्द्यमित्यन्योऽन्यहेतुत्वेन जनाः विभिन्नैः ज्वरातिसारादिरोगैः पीडिताः भवन्ति, जाठराग्निश्च दुर्बल एव भवति। अतः जाठराग्निं समीक्ष्यैवौषधान्न-पानविहाराणामुपयोगः करणीयः।**

इसके अतिरिक्त वर्षा में भूबाष्प से (वर्षा के कारण जमीन से निकलने वाली भाप से, उमस से), मेघनिष्यन्द से (बादलों से चूने वाले पानी की नमी से), जल के अम्लपाकस्वभाव वाला होने से अनिलादि दोषों का प्रकोप होता है। भूबाष्प प्रभाव से ही त्रिदोषप्रकोपक होती है। मेघनिष्यन्द वातश्लेष्मकारक होता है। जल की वर्षास्वभावकृता अम्लपाकता पित्त एवं श्लेष्मा को करने वाली होती है तथा इस समय होने वाला अग्निमान्द्य अपाक एवं विदाह के कारण कफ एवं पित्त को करने वाला होता है तथा धातुपोषकरस की उत्पत्ति नहीं होने से धातुक्षय के कारण यह अग्निमान्द्य वातदोष को उत्पन्न करने वाला होता है। इससे वर्षा में अग्निमान्द्य से वातादिकोप होता है तथा वातादि के कोप से अग्निमान्द्य होता है, इस तरह से अन्योऽन्यहेतुत्व के कारण लोग विभिन्न ज्वरातिसार आदि रोगों से पीडित होते हैं तथा, जाठराग्नि तो दुर्बल ही होती है। अतः जाठराग्नि की समीक्षा करके ही औषधान्नपानविहार का उपयोग करना चाहिये।

**अत्र केषाञ्चित्कषायाणामुल्लेखः क्रियते येषां प्रयोगेण जाठराग्नेः संरक्षणं भवत्यनिलादीनाञ्च दूषणं न जायते, यदि चेदनवधानतयाऽपथ्यसेवनेन वा वर्षाजनितानां रोगाणामुत्पत्तिः सञ्जायते तदा तु चिकित्सकस्य परामर्शेनौषधान्नविहाराणां सेवनं करणीयम्। स्वस्थावस्थायान्त्वाचार्येर्निर्दिष्टस्य ऋतु-चर्याविधेः परिपालनङ्करणीयम्। क्रमेऽस्मिन् वर्षासु सेवनीयानां कषायाणामुल्लेखः क्रियते, तेषां सेवनेन ऋतुजनिताः रोगाः न भवन्ति वर्षासु। ते च योगाः निम्नोक्ताः सन्ति, यथा -**

यहाँ कुछ कषायों का उल्लेख किया जा रहा है, जिनके प्रयोग से जाठराग्नि का संरक्षण होता है तथा अनिलादि का दूषण नहीं होता है। यदि असावधानी से या अपथ्य के सेवन से वर्षाजनित रोगों की उत्पत्ति हो जाती है तब तो चिकित्सक के परामर्श से औषधान्नविहार का सेवन करना चाहिये। स्वस्थावस्था में तो आचार्यों के द्वारा निर्दिष्ट ऋतुचर्याविधि का परिपालन करना चाहिये। इस क्रम में वर्षा में सेवनीय कषायों का उल्लेख किया जा रहा है, उनके सेवन से वर्षा में ऋतुजनित रोग नहीं होते हैं। वे कषाय निम्नोक्त हैं, यथा-

**ज्वरापवारकाः कषायाः -**

**वर्षाकाले बहुविधानां नवीनयुगेऽस्मिन्ना-विष्कृततमानां डेंग्यू-चिकनगुनिया-स्वायनफ़्लू-मलेरियेत्यादीनां ज्वराणां समुत्पत्तिर्विशेषेण जायते, तेषामपवारणायायुर्वेदीयकषायाणां प्रयोगो व्याधि-क्षमतोत्पादनार्थं करणीयमुत्पत्त्यनन्तरमप्यन्यैः तत्तत्व्याधिनिवारकैः भेषजैः सह कषायाणामेतेषां प्रयोगः सुखदः व्याधिनिवारकः, जाठराग्निसंरक्षकः बलोत्पादकश्च भवति।**

**ज्वरापवारक कषाय-(ज्वर को नहीं होने देने वाले काढे)**

वर्षाकाल में नवीनयुग में आविष्कृततम डेंग्यू-

चिनकगुनिया-स्वायनफ़्लू-मलेरिया इत्यादि अनेक प्रकार के ज्वरों की उत्पत्ति विशेषरूप से होती है, उनके अपवारण के लिये (नहीं होने देने की क्षमता उत्पन्न करने के लिये) आयुर्वेदीय कषायों का प्रयोग व्याधिक्षमता को उत्पन्न करने के लिये करना चाहिये, उत्पत्ति के बाद भी उन उन व्याधिनिवारक औषधियों के साथ इन कषायों का प्रयोग सुख देने वाला, व्याधिनिवारक, जाठराग्निसंरक्षक एवं बलोत्पादक होता है।

**1. ज्वरापवारणार्थं निवारणार्थं च पाक्यं शीतकषायं वा मुस्तपर्पटकं पिबेत्।**

ज्वर के अपवारण एवं निवारण के लिये नागरमोथा और पित्तपापडा का पाक्यक्वाथ (पकाया हुआ क्काथ) या शीतकषाय पीना चाहिये।

**2. सनागरं पर्पपटं पिबेद्वा सदुरालभम्।**

अथवा सोंठ के साथ पित्तपापडा को या पित्तपापडा, दुरालभा (जवासा) सहित (क्काथ) को पीना चाहिये।

**3. किराततिक्तकं मुस्तं गुडूचीं विश्वभेषजम्।**
**पाठामुशीरं सोदीच्यं पिबेद्वा ज्वरशान्तये।।**

अथवा चिरायता नागरमोथा, गिलोय, सोंठ का क्काथ या पाठा, उदीच्य (सुगन्धबाला) सहित उशीर का पाक्यक्काथ (पकाया हुआ क्काथ) या शीतकषाय ज्वर की शान्ति के लिये पीना चाहिये।

**ज्वरघ्ना दीपनाश्चैते कषाया दोषपाचनाः।**
**तृष्णारुचिप्रशमना मुखवैरस्यनाशनाः।।**

**(च.वि. 3/197-200)**

ये कषाय जाठराग्नि को दीप्त करने वाले, ज्वरनाशक और दोषों को पचाने वाले, तृष्णा (प्यास), अरुचि को शांत करने वले एवं मुख की विरसता (मुख में स्वादहीनता) का नाश करने वाले होते हैं।

**4. कलिङ्गक-पटोलपत्र-कटुरोहिणीभिर्वि-निर्मितं कषायं पिबेत्।**

कलिङ्गक (इन्द्रजौ), परवल के पत्ते तथा कुटकी से निर्मित क्काथ को पीवे।

**5. अथवा पटोल-सारिवा-मुस्त-पाठा-कटु-रोहिणीभिर्विनिर्मितं कषायं पिबेत्।**

अथवा परवल के पत्ते, सारिवा, नागरमोथा, पाठा, कुटकी से निर्मित क्काथ को पीवे।

**6. निम्ब-पटोल-त्रिफला-मृद्वीका-मुस्त-वत्स-कैर्निनिर्मितं वा कषायं पिबेत्।**

अथवा नीम की छाल, परवल के पत्ते, त्रिफला (हरड, बहेडा, आँवला), मुनक्का, नागरमोथा, वत्सक (इन्द्रजौ) से निर्मित क्काथ को पीवे।

**7. किराततिक्त-गुडूची-चन्दन-विश्वभेष-जैर्विनिर्मितं वा कषायं पिबेत्।**

अथवा चिरायता, गिलोय, लालचन्दन, सोंठ से निर्मित क्काथ को पीवे।

**8. गुडूच्यामलक-मुस्तैर्विनिर्मितं वा कषायं पिबेत्।**

गिलोय, आँवला, नागरमोथा से निर्मित क्काथ को पीवें।

**9. गुडूची-नागर-पाठा-किराततिक्त-कटु-रोहिणीभिर्विनिर्मितं वा कषायं पिबेत्।**

अथवा गिलोय, सोंठ, पाठा, चिरायता, कुटकी से निर्मित क्काथ को पीवे।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20


हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

| | |
|---|---|
| भारत में | ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा) |
| विदेशों में | $ 80 (विदेशों में हवाई डाक द्वारा) |

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेलः circ@bpdl.in



स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः


प्रतिष्ठायाम्,